* ओ३म् *

अनामुक्तमुक्तामालिकायाः प्रथममुक्ता

काकली

जानकीवल्लभः

❀ ओ३म् ❀

अनामुक्तमुक्तामालिकायाः प्रथममुक्ता

काकली

रचयिता—

श्रीपण्डितरामानुग्रहशर्म्मसूनुः

बालकविः

श्रीजानकीवल्लभललितललामशास्त्री

साहित्याचार्य्यस्साहित्यरत्नम् ।

प्रकाशकः

साहित्य-निकुञ्जम् मैगरा

(गया)

सम्वत् १९९१ सन् १९३५

प्रथमावृत्तिः १०००] [मूल्यं ।=)

Printed by D. L. Nighoskar,
Shri Lakshmi Narayan Press, Benares City.

कवितारहस्यम्

"श्लाघ्यास्ते कवयो यदीयरसनारङ्गाङ्गनसञ्चारिणी ।
धावन्तीव सरस्वती द्रुतपदन्यासेन निष्कामती ॥
अस्माकं रसपिच्छिले पथि गिरान्देवी नवीनोदय-
त्पीनोत्तुङ्गपयोधरेण युवतिर्मान्थर्य्यमालम्बते ॥"

❀ ❀ ❀

"न प्रौढशब्दाऽपि न चार्थपुष्कला,
नवाऽप्यलङ्कारशुभा कृतिर्मम
न श्राव्यवृत्ताऽरसिकै रुपेक्षिता
नवेति कैश्चिद्ध्रियते वधूरिव ।"

❀ ❀ ❀

साहित्य में यही चिरस्थायी होने की चेष्टा ही मनुष्य की प्रिय चेष्टा है। इसलिए देशहितैषी समालोचक यह कह कर कितनी ही उत्तेजना क्यों न दें कि सारवान् साहित्य का अभाव होरहा है, केवल नाटकों, उपन्यासों, और काव्यों से सारा देश छाता चला जा रहा है फिर भी लेखकों को होश नहीं आता। "क्योंकि सारवान् साहित्य से तात्कालिक आवश्यकता पूर्ण हो जाती है, किन्तु अप्रयोजनीय साहित्य में स्थायी रहने की अधिक सम्भावना है।"

—विश्वकवि-रवीन्द्रनाथ टैगोर।

× × ×

This is also the reason why if we insist on asking for the meaning of such a poem we can only be answered 'It means it self.'

A. B. Cradley.

Not marble nor the gilded-monuments of princes shall out live this powerful rhyms.

—W. Shakespeare.

शुभाशीःप्रशस्तिः

[श्रीमन्माध्वसम्प्रदायाचार्य्यदार्शनिकसार्वभौमसाहित्यदर्श
शाद्याचार्य्यतर्करत्नन्यायरत्नगोस्वामि—
श्रीदामोदरशास्त्री]

वाराणसेयविश्वविद्यालयेऽधीयानस्य ललितललामापराभिधस्य पण्डित-श्रीजानकीवल्लभशर्मणो हृदयतन्त्रीतोऽनुरणितां काकलीमाकलय्यानुकलमद-सीयकवनकलाकौशलाकलनोत्कणंतायामुत्कं कर्णकरणं कथमपि कुण्ठामचीकर-च्चेतः। नकिलाकाण्डकृतोऽयं कलकलो, न चापि कौतस्कुतीमाकाङ्क्षितु-मुत्कण्ठते, किन्तु प्रचञ्चूर्य्यमाणप्रतनाप्रतनपारिपाट्यपटिमानमेकपदेऽनु-पाल्यापि पद्धत्यन्तरपथिकीभूयापि सर्वपथीनतामजहती प्रकृता काकली नवकलेवरतया कामं नोऽजीहृषत्, सुतरामत्र विवक्षितानाख्यानमननुसूयुतां मा नाम प्रचीकटदिति कियदप्यवश्यं वक्तुं कामयामहे।

आस्थेयमेतन्ननु नवीनैरन्तेवसद्भिः कवयितुमिच्छद्भिर्व्युत्पित्सुभिश्चतुर-स्त्रयद्भिश्च स्वां शेमुषीं यन्न पिष्टपेषणमाचरता फलेग्रहिता शक्यसौलभ्या किन्त्वभिनवसरणिपरिचरणेनैव, नचेदमसम्भवीति वस्भ्रमणीयम्, यद्यपि चतुर्वर्गकलिता एव वर्णास्तथाऽप्येतैरेव रचनाचतुरिम्णा चतुर्वर्गतत्साक्षा-त्पारम्परीपरीतसुपरीतविपरीतसंपृक्तपरिस्थितिपरिपचेलिमवर्णविन्यासशैली-महिम्नानिरवधि वाक्यविधा सन्ति स्म सन्ति सन्ति च पुरा किमन्य-दुच्यतां, अन्ते च जगदीश्वरात्प्रार्थ्यते तत्कृपयाऽयं काकलीकोविदस्तावदे-तद्देशीयां काकलीमाकर्णयतां चिरमौपकर्णिकीकुर्वन् दीर्घायुर्भूयादिति कृतमधिकेनेति शम्।

वसन्तपञ्चम्यां, वै० सं० १९९१ }
काश्याम् }

प्रेमोपहारः

श्री ______________________

____

____

बालकवि

श्री जानकीवल्लभ ललितललाम शास्त्री

ज्ञान०, काशी । ५६७५-९१

समर्पणम्

अम्ब !

प्रतिबिम्बमपि न दर्शयसि ! बाल्ये लाल्यमुपेक्ष्य मां क्व नु गताऽसि ? किमपराद्धं मयाऽपराद्धं वा क्षमस्व तदा—'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति !'

हन्त ! भवन्तं विहाय शिशुं मामप्रशिक्षितायामपि तातेनाहन्त्व-न्निर्विशेषं पोषितस्तु परपुष्टोऽस्मि, अतएव करोमि कामपि काकलीं विकलां, सकले !

यद्यपि 'पक्षपातं' विहाय प्रसरति केवलं, परम्परया 'कुहू' ध्वनेः प्रभावमम्ब ! शुक्लपक्षेऽपि कृष्णपक्षो जायतेऽसन्मुखसुधा-करमण्डले !

विदग्धविहङ्गमा अपि केऽपि न शिक्षितां शिशोर्मे मञ्जुल-भाषां कथं श्रोष्यन्ति ? निर्दोषे !

किन्तु त्वम् .... ?

त्वन्तु श्रोष्यस्येव ! परपुष्टस्यापि (किमन्यतः पुष्टस्यापि) स्वशिशोः कलक्वणितामपि वाणीमाकर्ण्य का नाम न जननी लोकोत्तरा-नन्दमनुविन्दति ? लोकोत्तरे !

तव सेयं काकली परम्परमाऽतः, मातः !

वसन्त पञ्चमी
१९९१

अनुपमानन्दनो—
जानकीवल्लभः

काकली



बालकवि

श्री जानकीवल्लभ ललितललाम शास्त्री

ज्ञान०, काशी । ९६३५-२१

समर्पणम्

अम्ब !

प्रतिबिम्बमपि न दर्शयसि ! बाल्ये लाल्यमुपेक्ष्य मां क नु गताऽसि ?

किमपराद्धं मयाऽपराद्धं वा क्षमस्व तदा—'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।'

हन्त ! रुदन्तं विहाय शिशुं माम्प्रस्थितायान्त्वयि तातेनाहन्त्वन्निर्विशेषं पोषितस्सुष्ठु परपुष्टोऽस्मि, अतश्शृणु, करोमि कामपि काकलीं विकलां, सकले !

यद्यपि 'पक्षपातं' विहाय प्रसरति सेयम्, परम्पश्य 'कुहू' ध्वनेः प्रभावमम्ब ! शुक्लपक्षेऽपि कृष्णपक्षो जायतेऽसन्मुखसुधाकरमण्डले !

विदग्धविहङ्गमा अपि केनापि न शिक्षितां शिशोर्मे सदोषाम्भाषां कथं श्रोष्यन्ति ? निर्दोषे !

किन्तु त्वम् ....?

त्वन्तु श्रोष्यस्येव ! परपुष्टस्यापि (किमन्यत् ; दुष्टस्यापि) स्वशिशोः कलुषितामपि वाणीमाकर्ण्य का नाम न जननी लोकोत्तरानन्दमनुविन्दति ? लोकोत्तरे !

तव सेयं काकली परम्परमाऽतः, मातः !

बसन्त पञ्चमी
१९९१

अनुपमानन्दनो—
जानकीवल्लभः

तातम्प्रति

तात ! कथं कथयेयं साम्प्रतमस्ति न मे हृदये ह्रीः ;
पुरश्श्रीमतो यतोऽर्पितेयम्मया स्वीय-शिशुता श्रीः ।

× × ×

देव ! सेवयाऽवाप्तन्ते यन्मया प्रवरवरदानम् ;
तत्फलस्वरूपम्मे शैशवकलितकाकलीगानम् ।
परिपोषयितुं माम्पुरा यथाऽवज्ञातं स्पष्टं कष्टम् ;
तथामर्षणीयम्पुनरप्येतच्छ्रोतुं भ्रष्टं नष्टम् ।
तत्त्वमस्ति नो किञ्चिदत्र क्रीडनं केवलं कृपया;
श्रोतव्यन्तु तथाप्यगायि यत्प्रथमं बालेन मया ।

शिशुरयम्—
जानकीवल्लभः

नीरवः
मैगरा

कविपरिचयः

यस्याम्बाऽ'नुपमा' तातश्श्रीरामानुग्रहस्सुधीः ।
जानकीवल्लभस्सोऽयं कविर्विजयतेतराम् ॥

एवं विदाङ्कुर्वन्तु भवन्तो यद्यापि 'सुरभारत्या' जीवनस्य, अनल्पतपसां निर्लोभानां विद्याविनयैकविभवानां, सततश्रुतिश्रवणेन सन्तापितभवप्रभवपञ्च—क्लेशानां विषयरत्यभावेऽपि शास्त्रविषयरतीनां, परिग्रहाग्रहेऽपि धर्म्मैकपरिग्रहाणां, परप्रहाणेच्छयाऽगृहीतशस्त्रेऽपि सरस्वतीसंरक्षणार्थं सम्भालितशास्त्रशस्त्राणां गीर्वाणवाणीपाद — पद्मपरिचर्य्यापरायणानान्द्विजन्मनामहरहस्तत्समाराधनमेव निदानम् । किन्तु विज्ञानराशिनाशितान्धकारेऽपि कालेऽस्मिन्न दृश्यते प्रभाक्वचित्संस्कृतवाङ्मयस्य । हन्त ! यतन्तां के पुनस्तदभ्युन्नतये साधनमन्तरा ? यदि कश्चिदुपासकस्तद्गौरवार्थमुद्युङ्क्ते तत्समुन्नतये च, न हि तदा तत्साहाय्यमाचरति कोऽपि । परिभवादिना रोद्धुञ्च वाञ्छन्ति बहवः किन्तु । तर्हि सुरसरस्वतीजीवनं किन्तु भवेन्नामोन्नतम् ? किन्त्वेतत्क्षणेऽपि ये तत्सेवकास्स्वकर्त्तव्ये संलग्नास्ते साधुवादार्हा एव । तादृशस्पृहणीयचरितगणनाक्रमे 'काकली' प्रणेतार इमे श्रीपण्डितजानकीवल्लभललितललामशास्त्रिमहोदया न द्वितीयं क्रममधिगच्छन्ति । इदानीं स्वल्पे (ऊनविंशतिवर्षीय) वयसि विद्यमानानामेषां एतादृशकाव्यकलाकौशलं समुल्लासयत्येव सहृदयानां हृदयम् । इत्येतेषाम्परिचयपरिदानार्थं स्वान्तं स्वत एवाकृष्टम्भवति । अस्ति विहारप्रान्तान्तर्गतो गयामण्डलमध्यस्थो मैगरानामधेयो ग्राम एकः । तत्रानेकशास्त्रनिष्ठाधिष्ठाने लब्धप्रतिष्ठाः सद्वृत्ताः स्वधर्म्मानुष्ठानैकचित्तस्थानाः, संस्कृतसाहित्यशिक्षादीक्षाऽर्जितगुरुगौरवाः श्रीपण्डितरामानुग्रहशर्म्माणो निवसन्ति । तेषामेवैते काकलीकोकिलाः कविमहोदया नन्दनतां भजन्ते । यदेमे पञ्चवर्षीया

आसन्, तदैवैतेषां जननी श्रीमत्यनुपमा दिवं गता। तदनु पितृचरणै-रेवैतेषां लालनम्पालनञ्चाभवत्। तस्मिन्नेव वर्षे कृत एषांविद्यारम्भ-संस्कारस्तातपादैः। एभिर्नववर्षावस्थापर्यन्तं हिन्दीभाषाया अध्यय-नंविधाय, पितृपार्श्वादेव संस्कृतशिक्षाग्रहणं कृतम्। एकादशवर्षा-वस्थायाम्प्रथमपरीक्षां, त्रयोदशवर्षावस्थायां मध्यमपरीक्षां, षोडश-वर्षावस्थायां शास्त्रिपरीक्षां अष्टादशवर्षावस्थायाञ्च साहित्याचार्य्य परीक्षां समुत्तीर्णा इमे। तस्मिन्नेव वर्षे 'साहित्यरत्न' परीक्षां (ढाका, बङ्गाल) समुत्तीर्णाः। प्रायस्सर्वपरीक्षायामपि प्रथमश्रेणिरेवाधिगता। आचार्य्यपरीक्षायां विहारोत्कलप्रान्ते सर्वप्रथमतामाप्ता इमे "चन्द्रमौ-लीश्वरस्वर्णपदकं लब्धवन्तः। रत्नपरीक्षायाञ्च सर्व—प्रथमत्वात्स्वर्ण-पदकम्प्राप्तवन्तः। यथावसरं कविसम्मेलनादौ च बहवः पुरस्काराः प्राप्ताः। इदानीमेते कविमहोदयाः हिन्दूविश्वविद्यालयेऽत्राधीयते, अत्रापीमे प्रथमश्रेण्यामेव भवन्त्युत्तीर्णाः। कवितापठनादिकौशलेऽपि कुशला इमे। एवम् अध्ययनाभ्यन्तर एव काकलीयम्प्रणीता। १९३३–३४ वर्षीयकवितानामत्र विहितस्सङ्ग्रहः। मुद्रणात्प्राक् बहूनि पद्यान्यपसारितानि केनापि कारणेन। इदानीन्तन्वङ्गीयं 'काकली' याति भवल्लोचनगोचरताम्। तत्सौष्ठवविषये भारतप्रसिद्ध-विदुषां सम्मतय एवाल,म्प्रामाण्यविषयादन्यस्मादात एव विरम्यते।

आशासे भगवदनुपमानुकम्पया, सरस्वतीप्रसादेन, गुरुमहोदया-नां शुभाशीर्वादैश्चैतेषां सुरभारतीशुश्रूषाव्रतं सदा सर्वथा साफ-ल्यमवाप्स्यतीति तथास्तु।

श्री हीरावल्लभ शास्त्री
साहित्यव्याकरणसाङ्ख्ययोगशास्त्राचार्य्यः
साङ्ख्ययोगाध्यापकः प्राच्यविद्याविभागे
हिन्दूविश्वविद्यालयस्य काशी।

प्रास्ताविकम्

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्त्तते नाकृतपुण्यकर्मणाम् प्रसन्नगम्भीरपदा सरस्वती ॥

—महाकविर्भारविः

आभरतादापण्डितराजं काव्यस्वरूपनिरूपणानैपुणींप्रदर्शितवतां समेषामपि सहृदयानां-विचारपर्यवसानसिद्धमेव यत् यतः सहृदय हृदयस्य तिर्भवेत्, तदेव काव्यम् हि नाम । भवतु नाम प्रकारभेदः शाब्दिको वा भेदः । तत्तु बुद्धिवैभवविलसितमात्रमेवेति प्रतीमः । सा च हृदयद्रुतिकारणता शब्दार्थोभयनिष्ठैवेति न मनागपि संशीतिलेशः पदमाधास्यति सहृदय-हृदय--प्राङ्गणेषु । उक्तमेव केनापि महाकविना—

सा कविता सा वनिता यस्याः श्रवणेन दर्शनेनापि ।
कवि-हृदयं विट-हृदयं सरलं तरलञ्च सत्वरं भवति ॥

हृदयतारल्यं काव्याधीनम् । तच्च काव्यं शब्दार्थोभयपर्यासम् । यथा काव्ये आर्थिकी चमत्कृतिजनकता समपेक्षिता, तथैव शाब्दश्चमत्कारोऽप्यपेक्षित एव । तथाहि—

'शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते'

इति महाकविमुकुटमणेर्माघस्य सुसङ्गतं सूक्तम् ।

कदाचिदर्थज्ञानमन्तरापि प्रसन्नमधुरा शब्दावली केवलं सहृदयहृदयमुद्वेल्लयतीति प्रायः समालोक्यते । तदेवाह गद्यकविताचार्यः सुबन्धुः—

अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ॥

—वासवदत्ता

परं सा शब्दावली सर्वथा सरसा सरला सूपयुक्ता च भवेदिति नितरामावश्यकम्। अस्माकं साहित्ये कवितायां प्रत्यवयवं प्रतिलोम सरसत्वमावश्यकमेव समाम्नातम्। यथा प्रबन्धे, परिच्छेदे, पदे, वाक्ये, शब्दे, सन्धौ, वर्णे, वर्णयोजनायां सर्वत्रापि सरसत्वमपेक्ष्यत इति नाविदितचरं काव्यतत्त्वानुशीलनरसिकाणाम्। एतदभिप्रेत्यैवाह श्रृङ्गार-कविताग्रुरुस्तत्रभवान् जयदेवः—

'सरसकोमलकान्तपदावलीम्' इति।

यथा शब्दे तथैव चार्थेऽपि। अत्र विषये गहनतमो विचारसम्मर्दः समालोच्यते प्रखरतरप्रतिभावतां ध्वनिमार्ग—प्रतिष्ठापनापरमाचार्याणामानन्दवर्द्धनाभिनवगुप्त—मम्मटाचार्याणाम्। तदेतत् समासतः प्रतिपादितं ध्वन्यालोके—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥

सोऽयं ध्वनिरेव काव्यात्मत्वेनाभिमत उत्तमकाव्यत्वेन समाम्नातः। तदेवं शब्दतश्चार्थतश्च समुत्कृष्टतरैव कविता वस्तुतः काव्यशब्दं भजते इति सर्ववादिसिद्धोऽयमर्थः।

यथा काव्ये शब्दार्थयोर्वैशिष्ट्यमपेक्षितम्, तथैव वर्णनीयविषयाणाम्, रचनाप्रकारस्यापि च वैशिष्ट्यमपेक्षितमेव। वर्णनीयविषयाणां वैशिष्ट्यं समयानुसारं भवति। यथा यथा समयपरिवर्तनं भवति तथा तथा वर्ण्यविषयाणामपि परिवर्त्तनं भवति। विविध—देशीय—भाषाणां सभ्यतानां संस्कृतीनां सङ्घर्षेण च साहित्ये रचना—प्रकारेऽपि परिवर्त्तनमावश्यकमेव। विश्व—साहित्ये साम्प्रतमेतदेव परिवर्त्तनं प्रत्यक्षमवलोकयामः। परमस्माकं साहित्यन्तु प्रतिक्षणं क्षीयमाणं सङ्कीर्णतामेवोपगच्छति। काव्यं हि नाम परमरमणीयम्, अतिशयपेलवम्, स्वर्गीयञ्च किमपि प्रतिभानैपुण्यम्। सा च रमणीयताः—

'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।'

परमस्माकं संस्कृतकाव्य–जगति प्रतिशतं ९५ काव्यानि शृङ्गाररस-वर्णनपराणि, चत्वारि काव्यानि च राज्ञां वीरत्ववर्णनपराणि चाटुप्रायाणि, देवतास्तुतिपराणि वा, एकस्मिन्नवशिष्टे काव्ये सर्वेऽप्यनन्तविषयाः वर्ण्यन्ते। अस्माकमियं निर्द्धारणा कदाचिन्न विवदेत् सहृदयानां संस्कृतसाहित्य-सुधा-सरस-मानसानामित्यनुमिनुमः।

अन्यदपि विचारणीयम् विद्यते यत् वस्तुतो वक्रोक्तिरेव काव्यजीवितमिति मतमाविष्कुर्वता भट्टकुन्तकेन वक्रोक्तेर्यत् काव्यजीवितत्वमाम्नातम्, तत्सर्वथा स्वाभाविकं हृदयङ्गमञ्च प्रतीयते। वक्रोक्तिशब्देन, नालङ्कारत्वेनाभिमता वक्रोक्तिरस्माकमभिमता; परं तदुक्तिवैचित्र्यमात्रमेव। तदुक्ति-वैचित्र्यमन्योक्त्यलङ्कारे सर्वाङ्गसुन्दरमिव प्रतीयते। अतएव प्राचीनैः काश्मीरदेशीयैर्महाकविभिः सहृदयशिरोमणिना च पण्डितराजेन स्व-काव्येषु तस्या एव प्राधान्यं संस्थापितम्। पारस्य-अरबी-ऊर्दू प्रभृतिभाषा-काव्येष्वप्यन्योक्तीनामेव प्राधान्यमुत्कृष्टत्वञ्चावलोक्यते। साम्प्रतं हिन्दी-प्रभृतिभाषास्वपि सैव सरणिः प्राचुर्य्येणानुसर्य्यते। परमस्माकं साहित्ये प्रचाराभावादुत्साहाभावाच्च नोत्कृष्टा नवीना काव्यरचनाशैली, अभिनववर्ण्य-विषयाणाञ्च समावेशः कुत्रापि दृश्यते। सैव वक्रोक्तिः साम्प्रतं 'छायावाद' नाम्ना प्रसिद्धा वर्वर्ति।

साम्प्रतं जयपुरीयैः सहृदय–धुरन्धरैः श्रीभट्टमथुरानाथशास्त्रिभिः 'संस्कृत-रत्नाकर'—सम्पादकैरभिनवः समुत्साहः प्रदर्शितः। वयमिदानीं सुरसरस्वतीसंजीवनायैतादृशीमेव नवीनतामालोकयितुं व्याकुलाः स्मः।

अकस्मादेव प्रियसुहृदां प्रभूतोत्साहसम्पन्नानां नवयुवकानां श्रीजानकीवल्लभशर्म्मणां साहित्याचार्य्याणामभिनवोत्साहप्रदर्शनसौभाग्यावसरोऽयमपरं प्रमोदस्थानं हृदयस्य।

एतेषां 'काकली' शब्दतश्च, अर्थतश्च, वर्णनीयविषयवैशिष्ट्येन, रचना-नैपुण्येन, नावीन्येन च संस्कृत–साहित्य–संसारे कामपि जागरां जनयेत् समाहरेच्च सहृदयहृदयानीति सुदृढोऽस्माकं विश्वासः।

'काकली'—विषये नास्माकमपरं किमपि वक्तव्यम्। अत्र सहृदया एव निकषायन्ते। उक्तमेव कविकुलगुरुणा—

'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।'

परमिदमेव वक्तव्यम् यत् काव्यविषये यद्यदावश्यकमुपरि समुट्टङ्कितमस्माभिस्तत् सर्वमेवात्र समवलोकयामो यथायथम्।

अस्य कविकोकिलकुमारस्य श्रवण-मधुरां हृदय-हारिणीं 'काकली'-माकर्ण्य मा समुद्विजन्तु वराकाः काकाः। सहृदयाश्च नवीनतरमेतत् काव्य-माकलय्य प्रमुदितमानमानसाः कविकुलकुमारस्यास्य—उत्साहं समेधयि-ष्यन्तितरामिति सम्भावयामः।

साम्प्रतं संस्कृते काव्यसरणिश्छिन्नभिन्नाऽनवीकृता च संलक्ष्यते। पुरातन प्रथाप्रचलितान् वर्ण्यविषयानादायैव केचन कवितां कुर्वन्ति। तेनाभिनवविषयाणां समावेशस्तत्रनोपलभ्यते। परमनेन कवित्ररेणयत् साहसं कृतं तदतितरां सन्तोषास्पदं हर्षास्पदञ्च। कवेरस्य प्रसन्नमधुराम्, ललित—ललितां रमणीय—कमनीयां शब्दावलीम्, रचना·कौशलं विन्यास वैभवं सर्वमपि प्रौढतरसालोक्य सुदृढं वक्तुं पारयामो यदयं कविः संस्कृत-शब्द—भाण्डारे तत्तत्काव्यमर्मस्वपि पूर्णमधिकारं प्रावीण्यञ्च स्थापयति, प्रौढिमुपगतोविद्वांश्च, मयाऽस्य कवितां पठता स्वर्गीय-आनन्दोनुभूतः।

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः॥

सुप्रभात-कार्यालयः काशी
मकरसङ्क्रान्तिः,
१९९१

सहृदयानुचरः—
श्रीकेदारनाथ शर्मा सारस्वतः

अनुरणनम्

अयि सुरसरससरस्वतीसमुन्नतये स्पृहयालवः !
औपकर्णिकत्वाय प्रवृत्तेरस्या देयो लवः ।
चित्रायात्र प्रपञ्चे वैरिञ्चे वस्तूनि बहूनि;
दृश्यन्ते हृद्यानि, कुरूपाण्यपि रूक्षाणि मृदूनि ।
चित्रमयीयं पीतसस्यवसना भूः किञ्चित्रिता;
कल्लोलिनीतरङ्गैस्सततं किमियस्पवित्रिता ?
नभसि नित्यमुद्गतो नीलिमा सलिले मधु-मधुरिमा;
किमभूद्वसुन्धरायां लघिमा गिरिषु गौरगरिमा ?
कोऽस्ति चित्रकारो न्वेतेषामतिशयसिद्धकरः ?
संस्थाप्यैतानि यथावद् यस्सन्ततमनोहरः !
एतदुद्गमान्वेषणक्षणे समाकुलाः प्राणाः;
जगतो मेऽप्यहरहो रहो जीवन्तो म्रियमाणाः !
एकान्ते कान्तारे सहाङ्गनाभिर्हरिणकुलम्;
बालवल्लरिं, कोमलकिसलयकलितद्रुममतुलम् ।
परिमलमलयसमीरमधीरं क्रीडन्तं लतिकया;
चञ्चत्पञ्चमलयं कोकिलं सह नतया वनितया ।
कादम्बिनीं मोहिनीं सौदामनीततिं गगने;
कुसुमसमूहं, गुञ्जनचञ्चु मिलिन्दवृन्दमुपवने ।
सान्द्रचन्द्रिकाचारुचन्दिरं, कुमुदन्दलदरविन्दम्;
ललितदलेषु पतन्तं श्रीशीकरमपि मन्दं मन्दम् ।
प्रेक्ष्य प्रत्यहं सुखदुःखे च पुरोऽनुभूयमाने;
लीलोत्कलिकां जाने, निजहृदये विदूयमाने ।

एवमेव प्रकृतिक्रीडां व्रीडामिव कुलललनायाः;
सुन्दरीं विभाव्यैव, मे मनस्युत्पन्ना माया।
तया बलान्नीतोऽस्मिन् कर्मणि यत्किञ्चिदकरवम्,
ज्ञातवानहन्तत्कोकिलकमनीय 'काकली' रवम्।
नाध्ययनस्य बलं विमलं न विभाव्य मनोगतजवम्,
अनवाप्यैव सभाम्प्रतिभा, मपि काम्य-कवित्वलवम्।
अलिखं यत्किञ्चित्तज्जानीयां किं कवि-वचनम्?
तेन कृतं निजगिरां 'काकली'-नामधेयरचनम्।

× × ×

परिवर्त्तनशीलं संसारं प्रेक्ष्य बाल्य-यौवने;
नृपं, मुनिञ्च वर्त्तमानं सदने च कदापि वने।
वासन्तीलतिकाङ्कशयं सुमशयं कदापि वसन्तम्;
ग्रीष्मस्प्रावृषमपि शरदं पुनरपि शिशिरं हेमन्तम्।
जीर्णतरूणामपि दलानि हरितानि कदाप्यरुणानि;
निभाल्यानुमन्ये प्रकृतेः, परिवर्त्तनानि दयितानि।
तेन हेतुना'नवरीत्यैव' मया 'काकली' प्रणीता;
प्राच्यरीतिनाशार्थं न मतिर्नवनीतिं नीता।
उदाहरामि ध्वनींश्च नालङ्कृतीर्निराधाराः;
वहति तेन नो ध्वनिप्रवाहोऽलङ्कृतेश्च धारा।
'छन्दोहीनम्भवति न वा सुन्दरम्पद्यमिति धिया;
लिखितेयं 'काकली' मया, नो च्छन्दोभिया, ह्रिया।
अथवा, किञ्चिद्वृत्तवर्त्तत एवमया तद् गीतम्;
किन्तु पूर्ववन्न दृश्यते तत्पारतन्त्र्यमुपनीतम्।
'क्रियमाणो यतिभङ्गस्स्थिरमतिभङ्ग यतेर्वितन्यात्;
मधुरिम्णेति, तथा कृतो मया नालस्यान्नो वन्यात्।
अज्ञानाज् ज्ञानाद्वा व्याकृतिविरुद्धञ्च यद्गदितम्;
सन्ततमपि लोके बालानां स्खलितवचस्तद्विदितम्।

खगवागियमिति धिया केवलं श्रवणीया 'काकली';
दोषाकरकौमुदीव मे वा दुष्टा पदावली ।
अथमो मेऽयं श्रमो, श्रमो वैतादृशकृतिकरणे;
सुरभारत्यामित्यालोच्यं सुधियाऽत्रविहरणे ।
उत्साहो वर्द्धितो मे शिशोर्यैरपि गुरुभिस्ससततम्;
तेषामग्रे मेऽस्ति मस्तकं सर्वदैव विनतम् ।

साहित्यनिकुञ्जम्
मेगरा
(गया)

इति विनिवेदयति
विद्वच्चरणकञ्जचञ्चरीकः
श्री पण्डितरामानुग्रहशर्म्म-सूनुरनुपमा-
नन्दनो जानकीवल्लभः ।

उत्कलिका

गायक ! गायसि गुरुगानं, वादयसे वेणुमदीनम् ;
कथयसि कथमयि ! मामपि लपितुं ललितरागगुणहीनम् ?
कोमल कण्ठ ! कलालापस्ते भविता त्वरितम्पापः;
सोत्कलिक श्रोतृणां स्वान्ते वृथा भविष्यति तापः ।
प्रेरणयाऽलं सखे ! कथञ्चन लपितुमस्म्यहन्नालम् ;
सहृदयसरससमाजे सम्प्रति कोमाम्पृच्छति बालम् ?

× ×

किन्तु तवाज्ञोल्लङ्घ्यते ? तदा रोदिमि, वा गायामि;
आर्य्य ! विचार्य्यन्त्वया स्वयन्नैतत्किञ्चिज्जानामि ।
'अहो ! साधु गायसि' किङ्कथयस्युत्साहयितुम्मामयि !
करणीयैवङ्करुणाऽरुणमानसैरार्य्यमिश्रैर्मयि !!

नीरवः मैगरा
१–५–२३

'ललितबालम्'

——:०:——

काश्चन सम्मतयः

(१)

महामहोपाध्यायः

श्रीमान् पण्डितप्रमथनाथतर्कभूषण-भट्टाचार्य्यः

प्रिन्सिपल दी कॉलेज ऑफ ओरियेन्टल लर्निङ्ग

हिन्दू यूनिवर्सिटी बनारस

१५–९–३४

साहित्याचार्य्यस्य श्रीमतो जानकीवल्लभशर्म्मणः 'काकली' नामकं गीतिकाव्यं विलोक्य महान् खलु सन्तोषस्समधिगतो मया। अस्य नवोदितस्य कवेः पदलालित्यं, प्राकृतसौन्दर्य्यवर्णना-पाटवं, रसभावादिप्रकटनकुशलता च, सहृदयानां प्रमोदभरं नितरां जनयिष्यन्तीति मे सुदृढो विश्वासः। अस्य चिरायुषः कवितासेवाव्रतं सर्वथा साफल्यमुपैतु, इति श्रीवाग्देवीचरणाम्बुजयोः प्रार्थनं ममेति।

श्रीप्रमथनाथतर्कभूषणशर्म्मणः।

(२)

श्रीमान्, ईश्वरीदत्त दौर्गादत्तिदशास्त्री एम्. ए. एम्. ओ. एल्.

सुपरिण्टेण्डेण्ट संस्कृत एसोसिएसन

विहार एण्ड उड़ीसा (पटना)

१–१०–३४

जानकीवल्लभकवेश्चित्ताद्राद्रमाधुरी।
प्रतिमाऽप्रतिमाया वा प्रतिभायाः प्रतिष्ठिता ॥ १ ॥
तन्मनस्स्तनयित्नोर्वा स्त्यानास्तनितसन्ततिः।
तत्साधुतासमुद्रेकसुधादीधितिदीधितिः ॥ २ ॥

साहितीसरसीतीर्थस्नानपुण्यपुरस्कृतिः ।
सदादरसदाचारमन्दारमृदुमञ्जरी ॥ ३ ॥
सचेतश्चातकव्रातानन्दसन्दोहकन्दली ।
कर्तृकर्मण्यता कोत्तंसस्सौवर्णी वा पताकिका ॥ ४ ॥
कान्ता कान्तिमती काम्या कविकोकिलकाकली ।
करोतु "काकली" नित्यं कोविदानां कुतूहलम् ॥ ५ ॥

ईश्वरीदत्त दौर्गादत्तिः
विहारोत्कल संस्कृत–शिक्षाध्यक्षः ।

(२)

सर्वतन्त्रस्वतन्त्राः
पण्डित प्रवराः श्रीमन्तो बालकृष्ण मिश्र महोदयाः
हेड् ऑफ दी डिपार्टमेन्ट (वेदान्त)
हिन्दू यूनिवर्सिटी, बनारस ।

साहित्याचार्य्यं पदवीनवीकृतोत्साहसमेधमानप्रतिभाविभासित श्री ललितललामनामकविकोकिलकृतां काकलीमाकलयन् अमन्दमानन्दमनुविन्दामि । यस्मादिह गीतिकानिशमनसमनन्तरं वालिशानामपि मनःप्रमोदपयोनिधौ निमज्जति, किमुत सत्काव्यानुसन्धानसमासादितरसशालिनाम् ? विषयसमुदयोऽपि पदकदम्बकमिव कोमलतया कान्ततां क्वापि स्तोकतोऽपि नातिशेते, स्थालीपुलाकन्यायेन निदर्शयामि यथा "अये कामये राम ! ते वाललीलाम्" इति, इह किंविधः शब्दाभिधेययोर्मधुरिमा ? इत्यत्र मानसमेव मानतामश्नुते सहृदयानाम् । नचास्मिन् अधमकाव्यत्वसंशयो मनसि मनागपि समुन्मिषति, आलम्बनाभिरामरामरतिरूपभावोहि निर्मातृसमवेताभिप्रायविषयभावं भजते. कविविवक्षितव्यङ्ग्यविधुरीकृतशब्दार्थोभयत्वमेव तदित्यालङ्कारिकाणामनुमतम् । सपदिरत्यादिस्थायिभावोपहितविगलितावरणसच्चिदानन्दाभिव्यञ्जकतया तदावश्यकत्वं विदुषां विदितमेवेति न विफलता निर्माणस्य । पद्यमपि सुन्दरं

प्रकृत्यैव दुष्करं भवति, तत्राऽप्युपजीव्यतयाऽन्त्यानुप्रासमाश्रयन्ती गीतिः सापीदृशी; अतएव क्वचन यतिसंघातधीरताविघातकया वा गत्यन्तरविरहेण वा प्रसज्यमानोऽपि यतिभङ्गो न मे हृदि वेदनामातनोति। किमधिकम् इदमीयकवनयोग्यतां कालोचितामालोच्य सुदृढं विश्वसिमि यदयं साहित्यानुशीलनाहितविशदविवेकेन कविकुलकमनीयकीर्तिकीर्तितः काश्यपीतले न विलम्बेन भविष्यतीति।

२४–८–३४ } श्री बालकृष्ण मिश्रः।

(४)

श्री पण्डित महादेवशास्त्री साहित्यशास्त्राचार्यः

"व्याकरणाचार्य्यः"

प्रोफ़ेसर, दी कॉलेज ऑफ ओरियेन्टल लर्निङ्ग

४–१–३५

गोविन्दो गोनविन्दः कविरकविरसौ नीलकण्ठोऽपकण्ठः।
क्षेमो न क्षेमपक्षो गलितमदभरः फल्गुबन्धस्सुबन्धुः॥
सत्काव्योल्लासलीलाकलितकलकले काकलीकोकिलेऽस्मि-
न्द्राक्षामाधुर्यदीक्षाक्षममपि गणये पण्डितम्मण्डमेव॥१॥

(५)

श्रीमान् पण्डित कालीप्रसाद मिश्रो व्याकरणाचार्य्यः

हेड् ऑफ दी डिपार्टमेण्ट (व्याकरण)

दी कॉलेज ऑफ ओरियेन्टल लर्निङ्ग एण्ड हेड

वार्डन ऑफ दी फोर्थ होस्टेल, हिन्दू यूनिवर्सिटी बनारस

४–९–३४

ललितललामापरनाम्नः श्रीजानकीवल्लभशर्म्मणः प्रथमां कृतिं "काकली" मेतामाकलय्य, अनल्पानन्दवृन्दंवहामि। अभिनववयस्कोऽपि दिव्यां वाचमात्मसात्कृत्य मधुरां गीतिं गायन्नेष कविकुलं कौतुकाक्रान्तं कृतवानस्ति। 'काकल्या अस्याः' प्रतिप्रतीकं कविकर्मकौशलं परीक्ष्य पण्डितप्रकाण्डान्यपि विस्मयन्ते।

वयन्तु 'निनादयनवीनामये वाणि वीणाम्' इति पद्यपाठमपि प्रपठ्य प्रकामम्प्रसीदामः। मधुरो मसृणश्चात्र वर्णविन्यासप्रकारः, हृदयङ्गमश्च पदगम्यरसभावाद्यवगमः, मनोरमश्श्रवणसुभगश्च वर्णनिवहः। एतावति गुणसञ्चयेऽपिगीतावत्र प्रौढान् प्रसन्नांश्च वर्णान् यथानियमं विनायासश्च विन्यस्यताऽनेन कविना अर्थगौरवं मनागपि नोज्झितमिति मन्येऽल्पाल्पैरेव दिनैर्नैजैः शुभ्रैर्यशोभिः साहितीसुधासुहितान् कविसुधाकरानपि ह्रेपयि-ष्यति मोदयिष्यति च गुरुजनानित्यध्यवस्यति

कालीप्रसादमिश्रो (व्याकरणाध्यापकः)

(६)

श्री पण्डित विन्ध्येश्वरी प्रसाद शास्त्री

सूर्य्योदयसुप्रभातयोर्भूतपूर्व-

सम्पादकः ।

काकलीनतामहाभयादिव नीरवगीता;
द्विजकुलकलितरसालमञ्जरीस्वादस्फीता,
स्वरसननिन्दितवेणुविपञ्चीरवमाधुर्य्या;
सुमनोमनोमनोहरसकलरसायनधुर्य्या,
अयिभो 'ललितललाम' मम, वहुहृदयोत्कलिकाकली,
रुद्धावयति सदा सखे ! पुंस्कोकिल ! तव काकली ।

—श्री विन्ध्येश्वरीप्रसादमिश्रः ।

(7)

Dated the 13th December 193

It was with great delight and appreciation tha I could read the "Kakali" poems composed b Pandit Janki Vallabha Lalita Lalama Sastri of th college of Oriental Learning B. H. U. H instinct of poetic art is really praiseworthy, sp

cially in his student life. With the increase of his knowledge he assures us to be a genuine poet, which is a matter of great pride to us. He possesses a gifted talent and has a natural predilection towards writing poems. His composition is full of melody, rhyme and rhythm. When he will lay a definite plan before him, his art will surely help him in realizing his ambitions, and then he is sure to be held in high regard by the votaries of Sanskrit learning, to which, I wish, he may strive to attain in near future.

Sitaram J. Joshi
M. A.
Sahitya Sastracharya
C. O. L., B. H. U.

——:o:——

ललितललामापरनाम्ना श्रीजानकीवल्लभशर्म्मणा स्वकल्पितैर्नूतनैश्छन्दोभिः सङ्कलितं मुक्तकं नामेदमभिनवं काव्यम्पदमाधुर्य्येणार्थगाम्भीर्य्येण रसभावादिप्राचुर्य्येण सहृदयहृदयचमत्कारितया चैकैकेनापि पद्येन चमत्करोति चेतांसि सचेतसाम्, समुत्पादयति च सहृदयानां विदुषां चेतस्यानन्दसन्दोहम् । अस्याभिनवा रचनापद्धतिः स्मारयति "नूतनोऽयं छन्दसामवतार" इति भगवतो भवभूतेर्गद्यांशम् । अन्ते च भगवन्तं भवानीपतिं भूयोभूयोऽस्य कवेश्चिरायुष्ट्वाय यशोभिवृद्धये चाभ्यर्थये, इति—

२४–१–३५ }
अम्बिकाप्रसादोपाध्यायः
व्याकरणाचार्य्यः
(प्रोफ़ेसर ओरियेन्टल कॉलेज)

"परिचयः"

कुत्रागच्छेयं ? किन्वाहूयेऽहमनारतमग्रे ?
न मनो रमते जीर्णजगत्यस्मिन्, नाशा प्रत्यग्रे ।
कुत्र न तमसस्साम्राज्यं ? निन्द्येते किं मे नयने ?
स्खलितं किं हास्यं ? त्रास्यं शूलादि न कस्मिन् अयने ?
नाद्य गद्यते व्यथाकथा, किन्त्वमसि नु सुखी प्रमाता ?
तव मौग्ध्यस्यापि न किम्पीडा हृदि मे सम्प्रति जाता ?
पन्थानन्दर्शयिष्यसे जीवनयात्राया लोके ?
किन्तु न दर्शनमात्रमप्यहं हृदयोत्साहं लोके ।
किं नु भविष्यति पूर्णं मनो ? ग्रहीष्ये किं वरदानम् ?
जाने देव, न देयं वस्तु समीपे तेऽप्यसमानम् ।
कृत्वा लुण्ठनमकारणं करयापि, कियन्मे दास्यसि;
न भृतो भवितास्म्यहन्तेन, किन्त्वमपि मोदतां यास्यसि ?
एवमेव कुर्वन् सततं देवस्त्वमहन्ते दासः ?
त्रोटितस्तदा देवाद्यैव मया स दासतापाशः ।
नाभिमानलेशो मयि, संशीतिरुदेति न ते सत्त्वे;
अद्यापि तथैवास्ति घृणा करुणा वा जगतस्सत्त्वे ।
वर्त्ते नाहं कश्चिदन्यमानवो नवोऽद्य पलेऽस्मिन्;
किन्तु परिचयो जातो, ज्ञाते धेया दयाऽमलेऽस्मिन् ।

नीरव यामिनी
१२–२–३५

'ललितललाम'

आशा

पिधायाक्षिणी स्वच्छशोचिषो, सततं वर्द्धितपीडे;
विलुलिताभिलाषोऽपि निवत्स्याम्यद्यन निविडे नीडे ।
सुखमस्वाप्सं जीवनमात्रं, मतिरपि निद्रामग्ना;
अविश्वास्य ! समदं चलता चरणेन तवासौ भग्ना ।
वञ्चनचञ्चो ! चलति न चरणश्चेत् किं तव सोऽप्यचलत् ?
पङ्गुं कृत्वा साङ्घ्रियुगलमपि मां, निर्दय ! किं न्वमिलत् ?
संगोप्यैव सकलशक्तिं मे, निजसंस्थापितभक्तिः;
धिग्विधाय पाखण्डं, सफला कचिद्भवत्यनुरक्तिः ?
मुखमपि किं न निवद्धं ? 'किन्तु वदन् स्याः कचिदपि दृष्टः !'
धिग्, दूषणशतमण्डितोऽपि पण्डितः कथ्यते 'शिष्टः' ?

× × ×

अन्तरितोऽद्यावध्यहं किमर्थं लोकेनानेन ?
किमदृश्यं ? द्रक्ष्याम्येवाद्याध्वा ज्ञातोऽरिरवेण ।
श्यामलं वनन्दृश्यते पुरः, लोकचित्तमिव नूनम्;
कचिदत्रैव मम प्रियोऽपि गोपितो, येन हृद्दूनम् ।
मन्ये 'मनोरथः कस्यापि न पूर्णोऽभवद्यावधि';
मानवमनस्तदा कथं स्थिरं भवति 'सकामं', 'सावधि' ?
वञ्चनमेवैतत्, परं जगत् ! त्वच्छलना विज्ञाता;
मिलनाशां दयितस्य, मनो मे नैतत्परं विहाता ।

नीरवः
१४-२-३५

'ललितललाम'

रहस्यमयी

जीवनं स्थिति, मरणं गमनम्,
जीवनमरणयोर्मधुरमिलनम्;
त्वमसि प्रेयसि ! नवजगदयनम् ।

पुञ्जितमञ्जुलतमसस्सदनम्,
रुचिरं रोचिश्च तिमिरकदनम्;
उभयाश्रितमेतत्ते वदनम् ।

सुषमामयि ! लयजीवनजयनम्,
पीयूषगरलचञ्चलचयनम्;
अमलिननलिनं तव नव नयनम् ।

सानन्दवृन्दमनिशं विधुरम्,
कामिनि ! कषायितं, मधुमधुरम्;
संसृत्यसमं सममिदमधरम् ।

तन्मयतोल्लासहासपचनम्,
सततन्ध्वनिरणितकाव्यरचनम्;
तव गीतिनीतिमयमयि ! वचनम् ।

अस्पृश्यरहस्यराशिलासिनि !
कोमलकलिकापरिमलहासिनि !!
प्राणायिताऽसि मेऽक्ष्णोर्वासिनि !!!

नीरवशिशिरतमी
१६–२–३५

'ललितललाम'

'निशीथवीथ्याम्'

नीरवे जगति जागर्त्तीयं काऽपि कामिनी कृष्णा;
सततम्प्रेम्णा हृदये निहिता मनुजस्य तडित्तृष्णा ।
श्वाससमीरे धीरध्वनिमिममाकर्ण्य लज्जायाः;
असफलमनोरथस्य विश्वविश्रुतवासकसज्जायाः ।
तरलतरङ्गमपाङ्गप्राङ्गणे मतेश्शतच्छिद्रायाः;
भवति च संशयालुनॄणां सम्प्रति न लवो निद्रायाः ।
लोचनवातायनसंश्रितवदना व्रीडान्तःक्रीडा;
सुप्ते ह्यपि किं जागर्त्ति विलुलिताशस्य नु पीडा ?
स्वपिति नित्यमेतज्जगत्कदाचित् स्वप्स्यति चानुपमम्;
किं चीयेत जागरूकहृदयेन पुनर्मृत्कुसुमम् ?
उपकृतिकृतयोऽकृतिनः कर्णे किं कुर्वन्तु नु करुणाम् ?
स्वार्थश्यामां मतिमाकुरुते पुण्यप्रणयोऽप्यरुणाम् ।
जानन्नपि 'न स्थिरं धनं' कश्चिदचलचललुण्ठाकः;
फलमपि पापानां स्मरन् जनो तल्लीनोऽस्ति वराकः ।
योगवियोगौ नित्यौ चेदलमलमेतच्छोकेन;
चेन्निश्चितो वियोगोऽस्मादलमेतददयलोकेन ।

आशु प्रकाश्यमानानि पुस्तकानि—

१—कलिका
१—गोविन्दगानम्
३—मञ्जरी
४—बालवल्लरिः

प्राप्तिस्थानम्—

साहित्यनिकुञ्जम्,
मैगरा (गया)।

——:॰:——

"ममता"

जननि ! जनय नो कुतुकम् ।
कण्टकिकण्टकमपि कथयसि निजमिति कमनीयकुरवकम् ?
स्वरं लयं तालं नो जाने;
मूर्च्छितोऽस्मि मूर्च्छना विताने,
परम्प्रवृत्तस्सम्प्रति गाने ।
स्वशिशुरितिधिया वायसमपि मामिव लालयसि पिकम् ।
जननि ! जनय नो कुतुकम् ।

नीरवः
विजयादशमी
१९९१

'ललितललाम'

अनुक्रमणिका

—ॐ—

विषय	पृष्ठ
१—भारती वसन्तगीतिः	१
२—हरहारिगानम्	२
३—कविताकल्लोलिनी	३—४
४—पीयूषलहरी	५—६
५—प्रलापः	७—८
६—कलिके	९—१०
७—विरहः	११—१२
८—गीतम्	१३
९—गीतम्	१४—१५
१०—गोविन्दगानम्	१६
११— ”	१७
१२— ”	१८—१९
१३—अधिकालिन्दीकूलम्	२०
१४—सरसस्वप्नः	२१
१५—वनीम्प्रति	२२
१६—कल्लोलिनीम्प्रति	२३—२४—२५
१७—कादम्बिनीम्प्रति	२६
१८—कौशल्यालापः	२७
१९—षड् दोषाः	२२
२०—रुदितम्	२९
२१—गीतम्	३०
२२—विहङ्गमबाला	३१
२३—दीनोमीनः	३२
२४—दीपक	३३
२५—जागरणम्	३४
२६—सन्ध्या	३५
२७—मृत्युगीतम्	३६
२८—भग्नावशेषः	३७
२९—लघुता	३८
३०—भ्रमरगानम्	३९
३१— ”	
३२— ”	४०
३३—व्यथाकथा	४१—४२—४३
३४—सुलोचना	४४—४५
३५—सफलता	४६
३६—लोचनोल्लङ्घनम्	४७
३७—वाणीवन्दनम्	४८

काकली

कोकिल ! कृतः कलालापो नन्दने त्वया सानन्दम् ;
तत्प्रतिध्वनिः प्रसृतोऽधुना दिशि दिशि मन्दं मन्दम् ।
वायसेदृशेनापि वन्यपक्षिणा चेद्वनेऽनुकृतः ;
विज्ञातो न कथम्भवेद् धृदा मेऽपि स सततम्प्रसृतः
यो यस्यानुकरोति विभ्रमन्तस्मात्स्वयं स हीनः ;
त्वद्वाचोऽकृतेर्मलिना 'काकली' ततोऽस्मि च दीनः ।
माधुरी न साऽस्त्यत्र मसृणता मोहनता नालापे ;
किं शापे च वरे भेदो नो ? भवति च काककलापे ?
कुत्र नन्दनं वनम्प्राप्नुयान्नरलोकेऽत्र सशोके ?
सति पुरन्दरेऽपि न पुरन्दरं श्रोतारञ्च विलोके ।
तत्र वसत्युल्लासकस्सदा सुरभिरनादिरनन्तः ;
जीवनवने न मे कदाचिदायातो हन्त ! वसन्तः ।
निरुल्लासहृदये मे भावा विलयं यान्त्यायान्ति ;
क्वचिदप्यद्यापि न लब्धा चिरवाञ्छिता हृदा शान्तिः ।
आसीन्मे सुप्तो मनोरथो विपथे पतितोऽपतितः ;
अकस्माच्छ्रुतो वायसेदृशस्याद्य खलवो ललितः ।
कलवल्लकीगुणा इवासवश्शवतां गता इमेऽद्य ;
झङ्कृतास्समुच्छ्वाससमीरैस्स्पृष्टा इव मे सद्यः ।
स्वरकम्पनन्तत्क्षणं जातं, श्रुतिमण्डलमिव तन्मे ;
अहरहो रहो विरहो जातो, मनसो मेऽपि, च मममे ।
तदा न विज्ञाताऽऽकुलमनसा किं लपिता लपितावली ;
प्रलपितैव सा कथ्यतेऽधुना मया कोमला काकली ।
सुधास्यन्दिवचसस्ते स्मृतिंविधास्यति भूलोकेऽस्मिन् ;
काक-काकलीयं क्षम्या धेया करुणा च जनेऽस्मिन् ।

साहित्यनिकुञ्जम्
मैगरा
२८–४–३४

—जानकीवल्लभः

संशोधनम्

अशुद्धिः	पृष्ठ सङ्ख्या	पङ्क्ति सङ्ख्या,	शुद्धिः
कलित को	१	४	ललित को
तिधते	२	२	विधत्ते
मौला	,,	१०	मौलौ
मञ्ज	५	१६	मञ्जु
लोभनीय	९	९	लोभनीयं
वितरति	११	१	वितरसि
मुत्सरायेय	,,	५	मुत्सारयेय
तत्केनाशापि	,,	१८	किं न मनागपि
रूपिण	१३	१६	रूपिणि
पिवताम्	१४	५	पिवते
स्तीर्ण	१६	१	स्तरण
सुखम्	१७	४	मुखम्
कन्ति	२२	१५	कान्त
पद्मपराग	२४	२	पद्मपराग
त्वद्भासो	,,	१५	भासस्ते
गहनश्रय	२५	९	वनश्रय
ससि	३१	८	सखि
तै कृता	३७	६	तैः कृता
कर्त्तर्नो	,,	११	कर्त्तुर्नो
ग्रंत्तमा	३८	१	युंत्तमा
हृदम्मे	४३	६	मनोमे
धान विधाय	४४	९	धां विधाय
स्था	४६	८	स्या
लालिका	४८	६	शालिका

मत्परोक्षे प्रूफसंशोधनाद् वकारबकारयोर्भ्रमावसरेऽसावधानतया चाञ्चल्याचायुक्तसन्धिविधानाविधानादीनि मुद्रणे शतन्दूषणान्यजायन्तेति सुधीभिस्सदयं विचारणीयम् । डकारड़कारयोरपि । द्वितीयसंस्करणे काकल्या अस्या न केवलं कलेवरवृद्धिस्सचित्रं मुद्रणं वा भविष्यति, किन्तु विचार्य्य संशोधनरूपरिवर्त्तनमपि । एतदवसरे शुद्धिविधानार्थमनरुणनयनास्सखायो धीमन्तो वा निवेद्यन्ते सूचयन्तु, सकरुणमिति ।

अथेदानीं हिन्दीमन्दिरजटितसूर्य्यकान्तान् प्रथितप्रचुरयशसश्शान्तान् अन्वर्थाभिधेयान् श्रीपण्डितसूर्य्यकान्तत्रिपाठिनोनिरालामहाशयान् विनयावनतो विलोकये, तन्निबन्धप्रबन्धाध्ययनावाप्तपरिवर्त्तनविधिमतिततिरहम्।

यदाऽहं सर्व्वप्रथममेतादृशीं कवितामलिखन्तदा साकेतस्य संस्कृतं पत्रसम्पादका **श्री पण्डितकालीप्रसादशास्त्रिणस्तां** संस्कृतस्य मुखपृष्ठे प्रकाशय मदुत्साहं वर्धयित्वा 'काकली'—निर्माणस्यापि कारणतां गताः, अतो निजकाव्यनाटकस्य सूत्रधारसदृशांस्ताननुस्मरामि।

भारतवर्षस्याद्वितीया विद्वांसस्सर्वतन्त्रस्वतन्त्रा **श्रीपण्डित बालकृष्णमिश्रमहोदया** वीक्ष्येमां यादृशमुत्साहन्दत्तवन्तस्तत्फलस्वरूपम्प्रकाशनमस्याः।

तदनु मुद्रणावसरे विहितविविधसाहाय्यान्, शीघ्रताविधानाय भृशं विबोधकान्, एतदर्थमनिशं परिश्रममाचरतः प्राणानिवबहिश्चरान्निजान्तरङ्गसुहृदः "**श्री कृष्णनारायणजुगादे, श्रीदेवव्रत, श्रीनर्मदाप्रसाद, श्रीब्रह्मदेवमधुकरसहृदया**"दीन्निर्निमेषनयनस्सजलं समीक्षे।

× × × ×

तावत् कोकिल! ललितां नवरसवलितां च काकलीं कलय; यावत्प्रावृपि भेको न वदत्येकोऽपि भूमिसेकसम्भ्रान्तः।

काशी जन्म-तिथिः
माघ शुक्र द्वितीया १९९१ } 'ललितललाम'

———:❀:———

"मङ्गलम्"

जयति दुरितकृतिकदनं मतिततिसदनं विधायि भव्यानाम्;
मञ्जुलकुञ्जरवदनं हतमदमदनं महन्महः किमपि।
वामाङ्गीकृतवामं सुदिरश्यामं समाभिराममहम्;
वन्दे विपद्विरामं ललितललामं रमारामम्।

———:०:———

काकली

भारतीवसन्तगीतिः—

निनादय नवीनामये, वाणि ! वीणाम् ।
मृदुं गाय गीतिं ललित-नीति-लीनाम् ॥
मधुरमञ्जरीपिञ्जरीभूतमालाः, वसन्ते लसन्तीह सरसा रसालाः;
कलापाः ललितकोकिलाकाकलीनाम् ।
निनादय नवीनामये वाणि ! वीणाम् ॥
वहति मन्दमन्दं सनीरे समीरे, कलिन्दात्मजायास्सवानीरतीरे;
नतां पङ्क्तिमालोक्य मधुमाधवीनाम् ।
निनादय नवीनामये वाणि ! वीणाम् ॥
ललितपल्लवे पादपे पुष्पपुञ्जे, मलयमारुतोच्चुम्बिते मञ्जुकुञ्जे;
स्वनन्तीन्ततिम्प्रेक्ष्य मलिनामलीनाम् ।
निनादय नवीनामये वाणि ! वीणाम् ॥
लतानां नितान्तं सुमं शान्तिशीलम्, चलेदुच्छलेत्कान्तसलिलं सलीलम्;
तवाकर्ण्य वाणीमदीनां नदीनाम् ।
निनादय नवीनामये वाणि ! वीणाम् ॥
विनाताम्बृथा 'श्रीनिधि' श्रीर्निधीनाम्, वसन्तो हसन्मोहिनीं मोहिनीनाम्;
कथय, को विलम्बोऽम्ब ! वरवादिनीनाम् ।
निनादय नवीनामये वाणि ! वीणाम् ॥

हर-हारि-गानम् ।

हर, हर ! हेयं स्वान्तध्वान्तम् !
कोनु विधते त्वाम्विहाय कान्तं सकान्ति मे स्वान्तम् ।
हर, हर ! हेयं स्वान्तध्वान्तम् ॥

निजोत्तमाङ्गे तरलतरङ्गां गङ्गामङ्गीकुरुषे;
क्षालय कायालयकल्मषमथि ! कुरु मे स्वान्तं शान्तम् ।
हर, हर ! हेयं स्वान्तध्वान्तम् ॥

भव ! भूतिभिर्विभूषितोऽसि, कुरु मामपि भो भवभूतिम् ;
कालीदासोऽसि स्नेहात्, कुरु कालिदासमिव कान्तम् ।
हर, हर ! हेयं स्वान्तध्वान्तम् ॥

चतुर ! चारुचन्द्रं मौलौ धत्से, वत्से कुरु करुणाम् ।
देहि क्रीडितु, न्तमिव यशोवाऽनन्ताऽन्ते विश्रान्तम् ।
हर, हर ! हेयं स्वान्तध्वान्तम् ॥

श्रियं श्रीनिधे ! साहित्ये राहित्ये कुरु राहित्यम् ।
यत्नात्सकलसपत्नं कुरु दोषान्वेषणसङ्क्रान्तम् ।
हर, हर ! हेयं स्वान्तध्वान्तम् ॥

कविताकल्लोलिनी

अहमस्मि ललितकिरणो नवः ।
प्रकृतिसुन्दरीसरसविश्वजनमोहनमानसरागः,
सहृदयहृदयविहारिपारिजातस्रक्पूतपरागः ।
कुमुदकौमुदीविहितपरिभवः,
अहमस्मि ललितकिरणो नवः ।
मुदिरो नियमितनियतिर्ज्वलितावनिहितकृतप्रतिबिम्बः;
दीप्तदीपको विस्नेहस्स्तृतदरप्रकाशनिकुरम्बः ।
पवननिहितनिर्वाणताजवः;
अहमस्मि ललितकिरणो नवः ।
मञ्जुलमरालसुकुमारसारतानिदानमेकोऽस्मि शुभ्ररश्मिः;
बृन्दितमिलिन्दवन्दितसुगन्धितारविन्देन्दिरामन्दिरमस्मि ।
त्वरितविकसितसरोजिनीधवः;
अहमस्मि ललितकिरणो नवः ।
विततारकापटलहर्षक ✕ कुयकर्षककुलदैन्यदर्शकः;
परप्रतापतिमिरालिधर्षकस्नेहधवलधाराभिवर्षकः ।
प्रेमिकाहृदयरागिणीलवः;
अहमस्मि ललिलकिरणो नवः ।
उषोमोहिनीललाटतटसिन्दूरबिन्दुरतिमङ्गलच्छविः;
नयनसुन्दरोदयगिरेर्महारुणमयूखनिकरोऽस्मि जितरविः ।

मुदितविहङ्गमविहितसंस्तवः;
अहमस्मि ललितकिरणो नवः।

शरद्रजतराकानिशीथविद्योतमानमानससुधीमतः;
कवितालतासु विस्फुटित आशु कमनीयपल्लवो लोलताङ्गतः।
वेदैर्विबोधितः प्रशस्तप्रणवः;
अहमस्मि ललितकिरणो नवः।

चन्द्रचारुतरचन्द्रिकाचलाचलविलोचनचकोरसोदरः;
वर्द्धमानभवदावपावकविनीलनीरदतनोर्मनोहरः।
विरहविकलकलवल्लकीरवः;
अहमस्मि ललितकिरणो नवः।

सूक्तिसूतिभारतीभूतिभरकमलाविमलालापः;
जिष्णुविष्णुलासो महेशहासो विधातुरभिशापः।
भूयोऽभयभवेऽभवो भवः;
अहमस्मि ललितकिरणो नवः।

आयासितमृगराजिराजविरुदावलिवद्धननागः;
पिहितमञ्जमणितरलगरलधरतमस्तोमस्समनागः।
सदाऽऽहूतरिपुराहुराहवः;
अहमस्मि ललितकिरणो नवः।

छन्दोऽलङ्कारप्रपञ्चवञ्चितोध्वनिकलङ्करहितोऽपि तोयभः;
अभिनवस्य कविकोविदस्य कृतिनोहृदोऽस्मि सुकुरश्शुभप्रभः।
निजलीलयैव जीवितविरसशवः;
अहमस्मि ललितकिरणो नवः।

पीयूषलहरी

कृष्णेति कलय करुणया कर्णकमनीयम्;
अयि, विनयिपदेनैतेन मनश्शमनीयम्।
लोलेन लोचनेनाहं लोके लोकम्,
शोकेन केन सङ्क्रान्तो लोकं लोकम्।
मतिहतिर्धृतिहतिरभूदहोऽहरहो मे,
आनन्दसन्ततेरहो, नित्यविरहो मे॥
दीनेश, दीनदयया दुःखन्दमनीयम्;
अयि, विनयिपदेनैतेन मनश्शमनीयम्।
निधनोत्का विनैव वित्तमधीरा धीराः;
विलसन्ति हसन्ति धनेनाधीरा धीराः।
निर्विण्णा हन्त! वसन्ति दिगन्ते वीराः;
काका लाल्यन्ते हन्यन्ते कलकीराः॥
कच्चिदस्ति गतिर्मे कथय कुत्र गमनीयम्?
अयि, विनयिपदेनैतेन मनश्शमनीयम्।
पूजापरायणा वीतसूनवो जाताः;
सात्मजैर्नास्तिकैस्सेव्यन्ते वनवाताः।
कृतिपद्धतयस्ते सन्तु कथं विज्ञाताः;
हतधिया ह्रिया धृतयोऽपि गोपितास्तास्ताः।

भूयो भूदेवैः पदं न ते नमनीयम्!
अयि, विनयिपदेनैतेन मनश्शमनीयम्।
नन्दने मन्दमन्दं नन्दसि सवसन्तेः
जीवामि जगति जगदीशोच्छ्लसन् वसन्ते।
सुखसूतिभूतिभूषितो भवसि भोः कान्तः;
केनोपायेनापायेनाहं क्रान्तः॥
उद्दामकामरुचिराम, न तद्रमणीयम्;
अयि, विनयिपदेनैतेन मनश्शमनीयम्।

प्रलापः

उच्छ्वसन्ति किमु जीवनाद्यकाञ्चनकलकालेऽत्राणाः ;
भुक्तोज्झितमायिकविषया इव विषयजये मे प्राणाः ?
वसुवासनास्विहाय विभो, गच्छन्ति सघन-वन-सङ्गे ;
विदधति लोभमशोभन्त्वरितजलनिधितरलतरङ्गे ?
कीदृगिदङ्गगनङ्कियच्च गुरु, दृश्यते कथं सान्द्रम् ?
कुत्र नु हाराकारास्तारा, लोके चन्द्रमतन्द्रम् ?
किमु वहन्ति सद्यो नद्यो विस्तारितधारास्तारम् ;
भावयन्नपि न भावयामि तत्तद्वैषयिकं सारम् ?
ग्रीष्मो वर्षाश्शरच्छिशिरहेमन्तास्तथा वसन्तः ;
ऋतवः कुत आयान्ति, यान्ति किमु ? दृश्यन्ते न वसन्तः ?
कलिकेयं मुकुलिता कदाचिल्लुलिता लुब्धभ्रमरैः—
पथि पतिता, कथिता कियती वागस्माभिस्स्मयनिकरैः ?
ह्योऽहमभूवम्भुवनमितो, मितमाचष्टे क्षणशान्तः ?
कीदृग् जगदिदमयि, साम्प्रतमेवाहमस्मि सम्भ्रान्तः ?
श्वो भविता भूयः किं ? जाने नैव दैवत, गते मे ?
मोच्य शोच्यत्वङ्गतोऽधुना भूभावोऽय'न्ते मे'।
स्थास्याम्येव न ते भुवने, भुवनेश सुन्दरे भीष्मे ;
विधास्यामि वसतिम्वनेऽथवा ज्वलज्ज्वलनवद्ग्रीष्मे ।
आहूतोऽस्मि साम्प्रतं रिङ्गदुदन्वत्तुङ्गतरङ्गैः ;
तत्क्षणङ्गच्छामि मोचितस्तास्यदनङ्गासङ्गैः ।

मद्भञ्जनचञ्चो, त्वयाकृतं सममपि नभोऽभिधानम् ;
पूर्णन्तत्, नो शून्यमद्य लोकिष्येऽभून्मे भानम् ।
कोऽपि नाकलोको विहितो लोको नागस्य च कश्चित् ;
ज्ञास्याम्येव समस्तमद्य यद्यपि नैवास्मि विपश्चित् ?
शेषे किं शेषे जलधौ मृगये, किञ्चिन्न करिष्ये ;
किमु बिभेषि भो लोकमेहि पश्याद्य कियद्यं शिश्ये !
स्वच्छहृदय ! विच्छायताङ्कतम्प्रच्छन्नत्वमिदन्ते ;
लालायितो लोकितुं सम्प्रति पश्य, परेश पदन्ते ।

कलिके !

कृतसार्थाभिधवसुधाङ्के मृदि दधतो सदाऽमरीत्वम् ;
मालिपालितलतालिलालिते ऽमलपरिमलेऽसि का त्वम् ?

मञ्जुनिकुञ्जेऽस्मिन्, गुञ्जद्भृङ्गाङ्गनाङ्कितकाया ;
किमसि महीथलि, परब्रह्मणो मनोमोहिनी माया ?

शिशुहृदये निहृनूय सहृदयहृदयभावानविभावा,
अनुभूयात्मनि रहसि, हससि निहृनुतनवरसानुभावा ?

दधदयि, यज्ज्योतिश्च्योतितरसधानकौशलं सविता—
चषति रसं, सरसा प्रसरति सा ते परिमलकलकविता !

दिशि दिशि किरन् लोकलोभनीय कवितामकरन्दम् ;
वाति समीरोऽधीरामोदो मोदान्मन्दं मन्दम् ।

वरवृन्ते नृत्यन्तो, नतलतिकानन्दञ्जनयन्तो ;
मुनिमानसेऽपि मोहनभावं सततन्ततन्नयन्तो !

चुम्बन्त्युच्छ्वासैर्न विलासैस्ततश्स्थिराऽपि रसाऽभूत् ;
त्वमसि तेन नन्दनेद्दशी सम्प्रति कुञ्जस्य दशाऽभूत् !

गन्धमृगीव निजाङ्गसुगन्धौ भ्रान्ता किम्वनवाले !
पश्यसि मुहुर्मुहुस्तिर्यग्वलिताक्षी यन्निजजाले ?

किमीक्षसे, काम्यान्दृग्भ्यान्दृश्यसे जनैर्महनीया ?
त्वन्तव्या, साम्प्रतमशेषदेशीयदशा दयनीया !

किम्पश्यसि, पश्यति किं लोकोऽलिम्पार्श्वस्थं क्षोभात् ?
कमलदलन्त्वाज्ञाने तञ्जलममलमहं स्थमलोभात् !

देवि, विलोके ते रूपे दैवतललनालावण्यम् ;
सततश्चमत्करोति सचेतश्चेतो मामपि वन्यम् !
सुन्दरसौन्दर्यधृतौ लोके प्रकृतेः कृतेर्विकासम् ;
हासस्वनदेव्याः, वन्यस्त्वृन्दारकवृन्दविलासम् ।
कुसुमवाटिकानाटिके त्वदङ्के प्रेद्धे गुरुगन्धम् ;
लघुभारो भवितास्मि, धेहि कृपया मे गौरवगन्धम् !

विरहः

मिलननाटकस्यान्तिमाङ्क, जीवनजीवन, वितरति किम् ?
अहह, शोकनिवहन्दुततरमेतस्मन्दस्विहरसि किम् ?
काककलापैस्सह मधुरालापं कुर्वञ्जीवेयम् ?
कण्टकिनः प्रतनुप्रतिबिम्बं निस्वस्वा सेवेयम् ?

उच्छ्वासैस्समसुसमीरमुत्सरायेयमपि, नो किम् ?
अनुयामं यामिन्या लघयेयन्तनुमतनुतनो किम् ?
निद्रामपि न लभेय, न तन्द्राञ्चन्द्राननमपि नो किम् ?
आजीवनमेवं श्वसेयमयि, दयित, दया ते नो किम् ?

ग्रीष्मो वसतु सदोद्याने ध्यानेऽपि नैतु स वसन्तः ?
वर्षास्सततं सन्तु नयनयोरलयस्ते विलपन्तः ?
मीनस्त्विना मनोहरतास्त्वा व्रजत्वदयितां सलिलम् ?
मीनोऽयन्दीनो, विना जलं जीवति किं श्रितलीलम् ?

नभसि गताः केचन मे प्राणाः प्राणाधिकमीप्सितुमयि !
सखे, सखेदस्वच्मि लोचनन्तस्य न किञ्चित्सदयि ।
किञ्च पतङ्गः प्राप्स्यति पुनरपि दीपकमसुदीपकमयि ?
किञ्च चातकस्सजलजलदपटल श्यामं रूपञ्जयि ?

चञ्चूपुटञ्च चञ्चलयिष्यति चिरञ्चकोर ✕ पुनरपि ?
नीलकण्ठमण्डलञ्च नर्तिष्यति हा, तत्केनाऽपि ?

मिलनप्राग्भावस्त्वम्मिलनावसानस्य च शवस्त्वम् !
चिरञ्जीव मे विरह रहस्सम्प्रति मह्यं न नवस्त्वम् ।

× × ×

समं सहिष्ये, त्वमपि तथा कुरु रोचते यदा यत्ते;
त्वामुन्मूलयितुम्मे दयित × प्रच्छन्नोऽपि न यतते ।

"गीतम्"

नयने, नयने

प्रिये, पश्य मेऽवश्यमेव सम्प्रति नयने नयने;
कीदृक् सुखं, हन्त! मिलितस्मे कण्टकमयशयने!
मोदाश्रुमिश्रिते नयने; अयि नयने मे नयने।
सुखदुःखाभ्यामेव कृतोऽसारोऽयं संसारः;
कश्चिन्मिलति विजयो मया तु सततं लब्धो हारः
जयहारमयोऽयं संसारो, विनतन्ते किम्वदनम्?
सुन्दरि, सुषमासदनम्!
वहति नदीयस्मन्थरस्प्रिये ऽयस्पथिकोऽरसरसनः,
लसति स वस्त्रवेष्टित, श्शीतेविलपति निर्वसनः
तरुप्रतिबिम्बेऽयमनशनः।
चित्तञ्चमत्करोति तड़िद्वर्षति जलधरोऽपि कुहचित्
हसति मानवः क्वचिदपि, रोदिति कश्चिदचारु विपश्चित्
प्रसीदत्यसौ प्रासादस्सीदति मेऽपि न सदनम्;
जीर्णं छन्नच्छदनम्।
सुखरूपिणि, दुःखेन मे कदाचिद्दुःखी संसारः;
सुखदुःखाम्बुधिरयम्महाविस्तारो दुस्तारः
एहि मिलेवानन्तान्ते त्वमहं सम्भ्रम न ह्रिया;
अयि सुखमयि, मेऽसि प्रिया।
किं शमस्लाम्प्रतम्वने? द्वारमुक्तस्पुरो देवि, लोकय नौ, नवेऽयने।
नयने, नयने!

गीतम्

मधुरं मधुरम्;
रूपं सौन्दर्य्यं लावण्यन्ते मधुरं मधुरम्।
प्रिये, पश्य वरवचनविरचनाञ्जितमधुमकरन्दम्;
पतति तेऽधरे पीयूषं सततं मन्दं मन्दम्।
अयि वितरदमरताम्पिबताम्।

सहृदयहृदये, हृदये ते तिष्ठति मम समोऽनुरागः
पश्य दृश्यतेऽसौ तवाधरे प्रतिबिम्बितरागः।
अनुधरमीदृशमधरङ्कियदिति ? तत्सङ्ख्येयत्येषा;
लोललोचने, लोक्यतेऽधरे ते किमशेषा रेखा ?
चलितं कलितदृशो न भवेच्चञ्चलं सचेतश्चेतः;
दशनसमूहस्तत्कृतो नु किम्विधिना वसनसमेतः ?
अयि दयिते, सुदशनवसने !

सौदामनीवानुकादम्बिनि सचमत्कृति सुखसदनम्;
उपकमनीयकुन्तलावलि ललितन्ते सद्वदनम् !
सत्यमेव-सुन्दरं शिवं तत्सकलकलाकलितम्;
चित्रञ्चित्रकृतो न चित्रयितुमपि चित्तञ्चलितम् ?
तव देवि, दिव्यमाननम्।

आदिशक्तिरनुरक्तिराशिरासक्तिसन्ततिर्भक्तिः;
सर्वाण्यसि तेनैव मेऽधुना त्वय्येवास्ति प्रसक्तिः ।

कुर्वति ! नलिनं मलिनम्;
स्वदृशाऽऽशया समं मनोरथस्मे विदधति ! वलिनम् ।

जीवनं जयत्यनुधरम्;
देवि तवैव, लसत्स्वयं मनोमधुरं मधुमधुरम् ।

मधुरं मधुरम् !

गोविन्द-गानम्

कुसुमास्तीर्णनिषण्णां सततविषण्णाऽविभाव्य राधान्ताम्;
अनुगोविन्दमधीरन्धीरस्मितमाह गोपिका काचित्

—:❀:—

निन्दति नन्दननन्दनहरिचन्दनसुमपीतपरागम् ।
विन्दति मन्दं मन्दममन्दमिलिन्देन्दीवररागम् ॥
साऽशरणा मलहरणम् !
अशरणशरण ! वष्टि ते मञ्जुलमङ्गलकरणञ्चरणम् ।
ह्योभूद्याऽमलपरिमल वलित ललित पाटलकलकलिका ?
कलिकालेन नु, सम्प्रति साऽस्ति तदङ्गकण्टकावलिका ।
कमलाकरकमलामोदितकमलाकरकमलं कमलम्—
विनोदयति न, परन्तु नितान्तं तत्स्वान्तं क्लान्तं विकलम् ।
कुवलय किसलयसुकुमारं नीहारहारहरधवलम् ।
शीतलतलन्तदङ्गं वीतवलं विमलं विकलं सकलम् ।
सङ्गे विजितानङ्गम् !
वाञ्छति लाञ्छनहीन ! पीनमयि ! मुदिर मोहनन्तेऽङ्गम् ।
कोकिलकललापेङ्गितनृत्यन्मञ्जुमञ्जरीपुञ्जम्;
गुञ्जच्चञ्चुरचञ्चरीकसञ्चयसञ्चारितकुञ्जम् ।
सूक्ष्मनिरीक्षणलक्षितलक्षणमिवतत्क्षणमिव सोमम्;
पश्यति हर्षाद्धर्षन्तं तरलं गरलं प्रतिलोमम् ।

बालकुरङ्गापाङ्गतरङ्गायासितशम्पाऽऽकम्पा ;
सीदति पुण्ये वृन्दारण्ये सा क्रियतामनुकम्पा ।
कामयते ते श्याम ! सुखम्
साशा सा सानन्दमिन्दिरामन्दिरचन्दिरसुखम् ।

(२)

कमलदलायतनयनं कृतरुचिचयनमविलोक्य गोविन्दम् ;
रतिपतिवसत्यसोढां ललितनवोढामुवाच काचिदपि ।

——:o:——

कोमलकिसलयकुसुमाकलितकदम्बकदम्बघनम् ;
कलकोकिलरवनवनीलकण्ठलरसस्वरभास्वरवनम् ।
अयि सचकितहरिणीनयने ;
हरिणाङ्कोऽपि सशङ्कमुदेति नभसि विचलसि कथमथ ने ?
शरत्कलाधरशकलसुललितालिकरोचनरोचने ;
भाववती भव भामिनि ! भूयो रोचनरुचिलोचने ।
'कलकल—सकलकलाकलितं कोमलकालिन्दीकूलम् ;
मुग्धे, स्निग्धतरङ्गनिकरकरमार्जितमानमूलम् ।
अनुवातकचारुरवम् ;
कथयति हातुन्त्वरितन्त्वां निजमानसमानलवम् ।
बालवल्लवीशयकिसलयसंश्रितकरकमलमलन्तम् ।
रासविलासहासभासितवदनं मदनन्दमयन्तम् ।

वेणुरणनरसरसहरिणबर्हिणवृन्दैरपि कामम्—
काम्यमानमसमानमानमवमानय मा मेश्यामम् ।
नवनवनीतकपोललोललोचनलावण्यललामम् ;
कोमलकमलमुखीमनुचुम्बन्तं मदयन्तं कामम् ।
कज्जलमलिननलिननयनाहितललितनिजाधररागम् ,
हरिमवलोकय लोललोचने, श्यामासमानुरागम् ।
जनहृदयहारिवंशीवादनलालसानालसाङ्गम् ;
गोविन्दस्यामन्दविभ्रमपरिभाति जितानङ्गम् ।
कलधौते सौरभ्यं स्याद् ,
नवनवैरवयवैर्यदि ते सुन्दरितत्सङ्गतिम्विदध्यात् ।

(३)

उत्कलिकाकुलकलितां ललितामालीं विलोक्य विश्रान्ताम् ।
काऽपि परमसुषमाधवमाधवमाहस्म सुन्दरी मन्दम् ।

——:o:——

कलहंसावलिवलितसलिललीलायितललिततडागम् ,
पश्यति साऽसदृशी सुदृशी नलिनीन्दिन्दिरदररागम् ।
सममपि सशममवन्तम्
ललिता ललिताकृतिकृतिनं कामयते हन्त ! भवन्तम् ।
जिघ्रति शीघ्रमशीघ्रोच्छ्वासैरसममसमेषु प्रसूनम् ।
शान्तिभ्रान्त्युद्भ्रान्ताङ्गं किन्त्वधिकमाधिभिर्दूनम् ।

चन्द्रस्तन्द्रासान्द्रं कुरुते हृदयं त्वद्धश्यायाः
वक्ति शक्तिरियं यद्यपि तत्प्रति मामबलामपि पायाः।
सदाऽदक्षिणो दक्षिणानिलश्शमनसखोऽनलजातः,
जातोऽनुभव तदश्रुमिश्रितस्सम्प्रति झञ्झावातः।

क्षोणाङ्गी साऽहरहः

शिव शिव कियत्सह्यतां भवतः पीताम्बर बरविरहः ?
नवनवपल्लववृन्ददर्शितामन्दहृदयशयरागम् ;
तरुमपि वीक्ष्य परीक्षते ऽद्य भवतस्तत्प्रणय त्यागम्।
निजलावण्यतरङ्गसङ्गिभङ्गीभिरनङ्गितदेहा ;
वारिधिवीचिविवाद्य चञ्चला क्षणमपि नो शेते हा !
सम्प्रति खञ्जनलोचना सखीजनमपि खञ्जानीते।
दर्शनाशयाऽसौ जीवत्येतावति दिनेऽप्यतीते।

प्रेम करोतु न कृष्णम्।

कृष्ण गच्छ विच्छायमीक्षतान्तन्मानसं सतृष्णम्।

—:o:—

अधिकालिन्दीकूलम्

कलकालिन्दीकमनीयकूल !
अयि मोहनमङ्गलमञ्जुमूल !!
लीलालोलविलोचनललिताललितविलासविलोल !
सानन्दं मन्दं मन्दं प्रावृषि कृतसुन्दरदोल !!
श्रितसरसरासरसरचन !
रमणीरमणीयसुवचन !!
मुदिरमेदुराम्बरशम्बररिपुचिररुचिरुचिरशरीर !
कोमलकमलकलापकलितकलसलिलसलोलसमीर !!
अयि वेणुवलितवरवदन !
अङ्गानङ्गातपकदन !!
पेशलपावनपवनप्रसारितपरपरागवरराग !
विचलवीचिनिचयाञ्चलमकरनयनकवरीनवनाग !!
अयि सुरभिस्यन्दिस्यन्दन !
चन्दनपरिमलनतनन्दन !!
गोपाङ्गनागोपनीयगतगौरवकेलिनिधान !
चारुचञ्चलाचञ्चलस्मितिस्तृतहरिकीर्तिनिदान !!
हृतकामकोमलश्याम !
अयि लोचनललितललाम !!

—:०:—

नीरसस्वप्नः

वृन्दावने वादिता वंशी ।
गता तदानीन्दूरतरमहस्प्रावृषीव सखि ! हंसी ।
सकलमकलयन्निशि कलहासम् ।
जगत्, पक्षिपुञ्जं वनवासम्,
राधारमणोऽरचयद्रासम्;
भाग्यस्यालि ! मालिकेवासम् ।
तत्राभवन्न काचिद्बाधा
दर्शिता समैः प्रीतिरगाधा
चकिता, मृगो-वेष्टितव्याधा
अहम्, हसन्ती दृष्टा राधा ।
क्रान्त-स्वान्ता कान्तारे जाताऽस्मि सपत्नीदोषात्
ताडयितुन्तामुत्तानीकृतवती चरणमपि रोषात्
हा हा ! मुक्तो हन्त ! तदानीं स्वप्नो विरहाशंसी
वृन्दावने वादिता वंशी ।

वनीप्रति

कलितकिशोरकुसुमकुलसङ्कुलमञ्जुलवञ्जुलदले
निर्जनपदे वससि किं ? वद, अयि मे प्रियसखि विमले !
लसितहरितनवपादपपुञ्जप्रसूनपरागावले !
सफले, सजलेऽनलेऽनिले कमले, प्रियसकलकले !!
काऽसि ? कथय, अयि हले !
सरससमीरसमीरितनवनवपल्लवपूतगले !
धीरकोरकिर्मीरितलतिकावलिवलिते चपले ।
लोकितकण्ठीरवसहकृतिविज्ञातहृदयतलवले !
'झर-झर'ध्वनिभरनिर्झरकैतव ततलावण्यजले !!
काऽसि ? विपञ्चीकले !
विश्वविदितनिजहृत्प्रभावकृतप्रस्तरनिखिलाचले !
वीणेङ्गितनर्त्तनप्रवीणे ! विहितमयूरीच्छले !!
उत्कलिका मे भवति कुसुमिता लोकय पले पले !
ललितलतामोहन फलानुमितसरसमधुमधुरफले !!
कन्तिकपोलस्थले !

कल्लोलिनीम्प्रति

चन्द्रशेखरस्यास्य गिरीशस्यासि प्रिया सानन्दे !
पदद्वन्द्वमरविन्दमहन्ते मन्दं मन्दं वन्दे ।
गिरेस्तुङ्गशृङ्गादवतीर्णायास्ते गुणाः प्रियाः कति ?
शङ्करजीवनाधारभूते पूते हे नूतनपार्वति !
कृष्णादतिकठिनादस्माज्जाता गौरी सुकुमारी,
द्योतः परितो हरितो राजति सहृदयहृदयविहारी ।
क्रीडति सलिलेऽमले सलोलं कमनीयाकृतिकरिणी;
मन्दं विहरत्युपपुलिनन्ते मनोहारिणी हरिणी ।
मृगमृगेन्द्रयोस्तवजलपानात्पूतप्रीतिरादरिणी;
परिमलविमलशीतलाङ्गीयं जयति वने निर्झरिणी ।
वीचिनिचयचुम्बितचरणास्ते कुरवकबालतमालाः;
मञ्जुलवञ्जुलकुटजलिकुचघनपनसपलाशरसालाः ।
लसन्त्येकतो मुकुलितवकुलकदम्बमालतीमालाः;
गायन्त्यनुदिनमिह तीरे ते ललितविहङ्गमबालाः ।
आलि ! ललितललितं शृणोमि मधुकरमदमञ्जुलगुञ्जम्;
चलविलोचनो लोकेऽनिशमभिराममतामरसपुञ्जम् ।
चम्पकचन्दनचारु चपलपाटलदलनीलनिकुञ्जम्;
सरससैकते ते सुकुमारि ! विलोल-बालतृणकुञ्जम् ।

चञ्चलकिरणा अरुणदिनमणेस्त्वयि नृत्यन्त्यभिरामाः;
पद्मरागमणिजटितपटविभाः धत्से ललितललामाः।
कलकलरवेण पुण्येऽरण्ये कान्तकथाः कथयसि काः?
यतश्चञ्चलास्तरवस्सौम्यसमीरसमीरितलतिकाः।
गौरवरं शीतलं सलीलं सलिलसारमयि! तेऽङ्गम्;
किमुपगिरीशमनङ्गवदिव ननु धत्ते तरलतरङ्गम्?
चेन्नु निर्मिता पितामहेनेयं मृदुता निर्मलता;
तद् रसवति! दत्तैव कथं हा! हृदयतापिनी जड़ता?
उन्नतं कुलं पतिरतिसुभगोऽङ्गं शीतलञ्च मृदुलम्;
कलहासिनि! किं निर्जनविपिने तपोऽनुतिष्ठस्यतुलम्?
जातोच्चैशिशरसस्सती वनं स्प्रष्टुमिच्छुकन्दहसि,
कथय कथय किं कारणमेवमकारणमयि! किं वहसि?
कुटिलां कुलजे ते विलोक्य गतिमद्रिरभूत्पाषाणः;
गगनं शून्यं, मृद्धरा, जगत्प्राणोऽभूद्गतप्राणः।
अयि सुषमामयि! त्वद्वासो ज्ञातं केनापि न मूल्यम्;
तत्परिहृत्य वनं प्रयासि किं विज्ञातु निजतुल्यम्?
सत्युन्नतमस्तका दिवं द्रुतमभियातुश्चेदर्हसि;
स्वैरं स्वैरं स्वैरिणि! विपथे कथं कथन्तद्वहसि?
केन कथय, ताडितहृदयाऽभूरेवन्त्वमिह विरक्ता;
भिन्नस्वान्ता कान्तारे कान्ते! केनासि विभक्ता?

अधरणिजा गिरिजे ! रघुवंशेऽविवाहिताऽगतलङ्का ;
केन प्रेषितैकाकिन्यधुना रघुपतिना, का शङ्का ?
वल्मीकावलिरिहवने न वाल्मीकेश्श्रुतमभिधानम् ;
कुशलवमध्ये ! मध्येविपिनं कस्मात्स्यत इह मानम् ?
भीमभूमिभृत्कन्ये समसृष्टेस्सुषमान्दमयन्ती ;
त्यक्ता केन नलेन कथङ्कारं विपिने दमयन्ती ?
नववारणवालया प्रियस्वदया,ऽनसूयया यालि,
कण्ठीरवकन्यया ऽऽलितां, सत्यं किं शकुन्तलाऽसि ?
यस्य मनो न विशुद्धं, किमु तत्सघनगहनश्रयणेन ॥
किमुपदिशसिचलचरिते ! विपिनाद्बहिश्चरणकरणेन ?
श्लाघनीयचरिते ! चेद्गच्छसि रत्नाकरन्तदेहि ;
सफलश्रमा सपत्निजाह्नवी प्राप्ता चेत्पथि, वेहि ।
'रत्नाकरे'ति नाम केवलं मकरनिकररत्नत्वम् ;
कुरु मा श्रममभिधाने जाने तत्र विफलयत्नत्वम् ।
तत्सङ्गमेन मधुमधुरं ते सलिलं भविता क्षारम् ;
फलं सहृदयैस्सदा विचार्य्यं कार्य्यं कारं कारम् ।
दूरतमे देशे स्थितोऽस्तिजड़धिर्जड़धीरेकान्ते ;
मृदुचरणेऽशरणेव गमिष्यसिन श्रान्ता नगकान्ते ?
देवि ! तरलधारा हारावलिललिता रूपमदूषणम् ;
नैसर्गिककान्तौ भाग्येव कथं कामयसे भूषणम् ?
यदि समर्थयन्ती पुनर्जनिं पूर्वंपतिं नदीशम् —
कामयसे ? मितमिति वदामि,'गच्छ स्वेच्छयाऽस्तु ते शम्

कादम्बिनीम्प्रति

कादम्बिनो त्वमसि किम् ?

मद्दयितायाः नाम वर्त्तते तेऽपि ततो नु हससि किम् ?
कादम्बिनी त्वमसि किम् ?

चन्द्रः प्रच्छन्नीकृतस्त्वया मत्प्रियया मुखचन्द्रः ;
तारा त्वयि संलग्ना, मग्ना तस्यान्तदालि 'तारा' ।

तत्ससखी खे खेलसि किम् ?
कादम्बिनी त्वमसि किम् ?

सलिला त्वञ्च सलीलाऽसौ, हास्या त्वं सा सरहस्या ;
श्यामा त्वं, श्यामा वामाऽसौ, त्वत्समैव सा सरसा ।

रसं ततो नु दिशसि किम् ?
कादम्बिनी त्वमसि किम् ?

कौशल्यालापः

अये कामये, राम ! ते बाललीलाम् ।
गतिन्दर्शयोद्दामदोर्षि सलीलाम् ।

विलोके विभो ! वक्र चक्रञ्च शङ्खम् ।
सशङ्कन्नु जानामि नैजञ्च शङ्कम् ।

कुरु स्वाकृतिं लोकलावण्यशीलाम्,
अये कामये, राम ! ते बाललीलाम् ।

निजाङ्केऽङ्ग ! कुर्यां कथङ्कारमारात् ?
भवेत्किं भयं नापि संसारसारात् ?

श्रियं श्रीनिधे ! धेहि मेघालिनीलाम् ।
अये कामये राम ! ते बाललीलाम् ।

षड् दोषाः

प्रलयो न भवेन्न भवे पुनरुद्भवेन्मानवः कश्चित्;
'निद्रा' चेन्न भवेन्नभवेत्कश्चिन्मूर्खो न विपश्चित्।
त्वरिततरं विकिरेत्तरणिर्धरणौ स्नम-किरणसमूहम्;
'तन्द्रा' चेन्न भवेन्न भवे किं पश्यसि परप्रत्यूहम्?
अपचीयेत न महिमा परमेश्वरस्यापि किं कामम्;
'भयं' भवेच्चेन्न भवेत्किं नानर्थवृन्दमविरामम्?
निर्मीयेत नवस्वर्गो नो, सीता स्याच्छितलङ्का;
'क्रोधो' न भवेन्न भवेदुद्धारो धरणेः, का शङ्का?
लक्ष्मीस्स्याच्चेटीव नटीव भवेद्धी र्हृद्धतनिष्ठे;
'आलस्यं' न भवेन्न भवेच्छेषो धरान्धरन् पृष्ठे।
किं सृज्येत सुन्दरी कविता विश्वजनीनसुभावा;
'दीर्घसूत्रिता' न भवेन्न भवेद्धिद्धत्ता स्थिरभावा।

'रुदितम्'

रोदिषि किं ? श्रृणुते कः क्रन्दनमिदं सकरुणं जगति ?
निर्दयतमा मनुजजातिस्सङ्गीतवल्लभा भवति ।
विपदि धैर्यदातारं सम्पद्युपदेशकं न लोके;
अनवद्यं निगदन्न कोऽपि कोलाहलमयेऽपि लोके ।
अधमाश्शोकप्रदास्सन्ततं स्वच्छन्दं विहरन्ति;
हन्त ! सुधीमन्तस्सुखं धरायास्पदमपि न धरन्ति ।
चालयन्ति च महान्तश्चा दूक्त्यैव शिरो नगतुल्यम्;
सखे ! सखेदत्वे हि संसृतौ किन्त्वद्रोदनमूल्यम् ।
देशदशामुद्दिश्य हि प्रयुक्ता व्यवहारा युक्ताः;
अलमलङ्करिष्यन्ति किं जगद्-धृदयं लोचन मुक्ताः ?
स्वान्तस्सन्तोषाय सन्ततं यद्यपि रुदितंललितम्;
लोकयितुं लीलां लोकस्य तथाप्येतद्व्याकलितम् ।

गीतम्

सदयं सदयम्,—

प्रिये ! जगति वर्त्तस्व सन्ततं समेऽसमे सदयम् ।
कानवचारिवृन्दमयि ! सदयम्;
गगनविहारिपुञ्जमपि सदयम्,
सदयं श्रितसलिलं सर्वं, गर्विणि ! कुरु करणं सदयम् ।
वर्षति जलधरावलिस्सदयम् ;
धरति धरा जीवालीस्सदयम्,
सदयं धत्ते धराधरो धरणिन्धर धियमिह सदयम् ।
वाति समीरस्सततं सदयम्;
वहति तटिन्यास्सलिलं सदयम्,
सफलं तरुवृन्दं सदयं, भव भवे भूतिभृत् ! सदयम् ।

विहङ्गमवाला

भ्राम्यन्ती ते रूपवने मे प्रीतिविहङ्गमवाला
गता, तत्र बभ्राम, हन्त ! कुर्यां किमहं वनवाला ?
भ्रुकुटिलताशीतले तले ते मञ्जुल-लोचन-नीडे
त्वत्कुन्तलकोमलकिसलयनिकुरम्बवीतरविपीडे।
श्रान्तेवाशु विवेशासौ कुर्यां किमहं वनवाला ?
अपरिचिते बभ्राम वने, मे प्रीतिविहङ्गमवाला !

× × × ×

धीरं धीरं वच्मि मुखेऽहं खगवाले ! त्वन्धन्या;
अन्यवने भ्रान्ताऽसि कथय सखि ! नासीः किन्त्वरुन्धन्या ?
आशाऽऽशाविस्फारितनयना शयनागारे स्वीये;
पर्य्यङ्काङ्के हन्त ! निषण्णा ध्यानं मुखे त्वदीये।
पुनर्मिलेद्द्रष्टुञ्चेत्तद्विपिनं प्रकृतेर्यन्नु मतम्;
त्वामन्विष्य तदाऽहं कुर्य्यामपि वदनन्ते विनतम्।
पाण्डुरम्मुखं निखिलाङ्गं हा ! क्षीणप्रायं जातम्;
किं कुर्यां क वनन्तद्रूपन्ते सम्प्रति नावाप्तम्।
अन्यवने भ्रान्ताऽसि कथय सखि! नासीः किन्त्वरुन्धन्या ?
धीरं धीरं वच्मि मुखेऽहं खगवाले त्वन्धन्या।

——:o:——

दीनो मीनः

तव नवलावण्याम्बुधिसलिले लवलीलया विलीनः,
दोलाकालविलोलापाङ्गो मे चञ्चललोचनमीनः।
कियत्कालमुत्प्लवनं कृत्वा रागसागरे दीनः,
मग्नो, मन्दं मन्दं पीत्वा तद्रसमभूच्चपीनः।

रक्तं सान्द्रपदं विहरन्तं तं लब्धुन्तत्कालम्,
निजकेतनोपयुक्तमनङ्गो विस्तारितवान् जालम्।
बद्धो हन्त ! स एष साम्प्रतन्निर्गन्तुं हा ! नालम्;
विक्रेतुं गच्छति तद्दयिता धृत्वेन्दीवरनालम्—

वामेऽवामे करे तद्युतं पत्रनिर्मितं पात्रम्,
वदति "गृहाण स्पृहणीयं नवमीनं काञ्चनगात्रम्,
पश्यन्त्वत्र भवन्तो रचनापाटवं च वैधात्रम्"
हासं हासं वदति च मूल्यं 'सदयहृदयहृन्मात्रम्'।

दयित ! विधाय दयामयि ! मयि कश्चिद्विषयो नो शोच्यः
द्विगुणितमपि मूल्यं दत्वा दीनो मीनो मे मोच्यः।
दोलाकालविलोलापाङ्गो मञ्जुललोचनमीनः
तव नवलावण्याम्बुधिसलिले लव लीलया विलीनः।

—— × ——

"दीपक !"

अनिलान्दोलितशिख दीपक, दीपयसि तमोमयभुवनम्;
ज्योतिस्त्वं किं ब्रह्मणोऽसि दर्शयसि मनो, मोहघनम्!
स्नेहपूर्णदेहोऽपि ज्वलसि ज्वलयसि प्रेमिपतङ्गम्;
कथयसि किं स्नेहरूवयं ज्वलत्यपि दाहयति पराङ्गम्!
प्रदर्श्याथवा बाह्यस्नेहं पुनराकृष्य पतङ्गम्;
ज्वलयसि! मुखे रामनाम, पार्श्वे च करोष्यसि सङ्गम्।
अन्योपकृतावथवा ज्वलयसि, प्रिय मे, स्वीयशरीरम्;
पन्थानं पूतं प्रदर्श्य निर्वासि नु धीरं धीरम्।
अथवोपदिशसि जगदेवं क्षणमिव विभाति निर्वाति!
सतां मुखं सुखदुःखयोस्ततस्सततं सममवभाति!
वर्त्तिकयाऽसि कयापि बर्द्धितस्तेन भासयसि लोकम्;
उत्साहितो हितैषिभिर्नवः कविरिव प्रतिभाऽऽलोकम्!
भ्रान्तिकृतैरपि पापैर्लोको याति नाशतां लोके;
भ्रान्तिनाशितपतङ्गो निर्वासि त्वं ततो, विलोके!

× ×

कृतकार्योऽस्यहार्य्यनिश्चय, चेद् यासि पुनस्स्वच्छन्दम्-
याह्याया स्यहमपि ज्वलज्ज्वालयंश्च मन्दं मन्दम्!

—:०:—

"जागरणम्"

संजागर्मि विनिद्रो हततन्द्रोऽहं भूत्वेव हरः ;
किमभूत्तदा, लोकशोक ! त्वम्मे निद्राच्छेदहरः ।
मोहसागरे हतमतिर्लोको हरिरिव शेतेऽहरहः ;
किमभूत्तरिरिव तस्यौ, निद्रयं व्यदधान्मे प्रियविरहः ?
लोकमानसं नो जानीते ब्रह्ममयं सम्वस्तु ;
किमभूद्-यदि हृदयं हृदयेशमयं मे केवलमस्तु ?
तिष्ठति लोकमानसं चपलं क्वचिदपि चिरन्न प्रकृतेः ,
किमभूद्-यदि हृदयं मयाऽर्पितं सम्प्रति दयितस्य कृते ?
वीक्ष्य वीक्षणे मेऽरुणेऽद्य ते किमपि वदन्ति हसन्ति;
किमभूत्-प्रियं प्रेक्षितुं हृद्रागा मेऽक्ष्णोर्निवसन्ति ?
स्वप्नदशामागत्य पश्य ते हन्त जीवनं घ्नन्ति ;
किमभूत्-प्रियं मृगयमाणाः प्राणा मे सदोच्छ्वसन्ति ?
सुखदुःखं विस्मृत्य तदात्मा वृथा विमुग्धश्शेते ;
किमभूद्-दुःखैर्मे, विबोधिता जगत्पदार्थास्ते ते ?
अद्यनिद्रया ते वशीकृताश्वो भवितारस्त्ववशाः
किमभूदुन्निद्रस्य मे चिरन्तिष्ठेदियमेव दशा ?
अर्द्धसमयमवलोकयन्ति ते जगतः कमपि विकारम् ;
किमभूदौन्निद्र्ये संसारस्याजानं समसारम् ?

× × ×

निद्रातन्द्रामदमोहा मे समेऽप्यमी प्रिय, पिहिता ;
किमभून्न तदा, चेत्त्वया हृदो मे·जागराऽपि विहिता ?

—×—

'सन्ध्या'

अनुदिनस्वर्द्धते संसारस्योपरि चेत्परिरोषः ;
किम्भवति न भूयो हृदये तत्परित्यज्य सन्तोषः ?
वसुधामृत्तिकाऽविधायान्तर्हितां स्थितान् प्रासादान् ;
प्रत्यहम्प्रेक्ष्य जाने किं मद्विप्रयोगसविषादान् ?

विहगा विलोक्य मां किमिमे किञ्चिद् गायन्ति रुदन्ति ;
संस्मार्य्यं भविष्यद्वाणीमध्वनि कस्यापि नुदन्ति ?
गीतान्येतानि तरूणामप्यन्तस्तलन्तुदन्ति ?
व्याजेन पतितपत्राणां मुञ्चन्त्यश्रूणि, रुदन्ति ।

प्रत्यहम्प्रतीचीमञ्चे सा सन्ध्या सन्ध्यायति किम् ;
श्यामलम्वसाना वासो मृत्योर्गीतं गायति किम् ?
अयि ! पश्य, विकीर्णस्तस्यास्सञ्चितो मनोरथरागः ;
गतगुञ्जनहृदयविपञ्च्या उत्थितो विलीनो रागः ।

पश्याशु, सदाशाऽपूर्णा सह तमसाऽशासु विभक्ता ;
मानवाः ! किमेवं जगतस्साम्प्रतं स्यात न विरक्ताः ?
विरुतानि विहगबालानां हृन्मोहनानि कान्तानि ;
अक्रन्दनैस्समं सम्प्रति विज्ञायन्ते शान्तानि !

मीलन्नयनयोर्विलोके प्रतिबिम्बं संसारस्य ;
आयाति रुद्ध-कण्ठात्कि वार्त्ता तस्यासारस्य ?
प्रचलन्ति पथा ते केचित् ? गच्छन् मानव सम्प्रति शृणु ;
हतनिश्श्वासो, गतमोहत्वस्याद्वयामरं वरं वृणु ।

——:o:——

"मृत्यु-गीतम्"

कलं कलं प्रतिपलं श्रूयते किमिति साम्प्रतं ललित-रागिणी ?

अनुभवामि शीतलं समीरम् ,

ज्योतिरुदयते धीरं धीरम् ;

तीरं त्रयीगीतिमयमयि ! दृश्यते नयनमोहनमन्दाकिनी ।

मनोनन्दनस्पश्य नन्दनम् ;

ससन्तानमयि ! सहरिचन्दनम् ,

पारिजातप्रतिबिम्बे नृत्यति मञ्जु-मेनका नव-सौदामनी ।

कीदृगसारोऽयं संसारः ?

विजयो नास्ति, सन्ततं हारः ,

आनन्दस्य दिनं न यत्र, शोकस्य दृश्यते श्यामयामिनी ।

दिव्यशेमुषिश्शवसिमि साम्प्रतम् ,

मनोऽचञ्चलस्पथि विनिश्चितम् ;

कलित-चन्द्रिरं ललित-मन्दिरं मन्दमन्दमयि ! यामि भामिनि !

"भग्नावशेषः"

इष्टिके! किमिष्टं पश्यसि,? नश्यति जीवनं समेषाम्।
त्वमिव त्वन्निर्मातॄणामपि सैव दशाऽभूत्तेषाम्।
किं मिलसि मृत्तिकायान्त्वं गत्या जितश्वस्पाकम्पा।
मृदि मिलितास्त्वन्निर्मातारस्त्वयि वर्द्धितानुकम्पाः!
प्रस्तर, पश्यसि किं सारं? संसारान्मा विमना भूः!
प्रस्तरीविहितनिजहृदयैर्विगतैस्तैःकृता 'रसा' भूः!!
भित्ते! दीर्यसे कियन्ति त्वयि जीवनानि जीर्णानि!
हृदयानि गच्छतान्तेषामयि! तुभ्यमेव दीर्णानि!!
कौशिक! लोकस्यास्य त्वं नव-कौशिकोऽसि, कुरु शब्दम्!
झङ्कृताः पुरा वीणानामत्रैव गुणाः कियदब्दम्!!
निस्सरताधुना समीक्षाकर्त्तनौ शोकोच्छ्वासाः!
स्नेहोद्गारामोदैरपि वासिता प्राग् यदावासाः!!
भग्नावशेष, किम्पश्यसि पुष्करं हन्त! तच्छून्यम्!
उज्ज्वलिताक्षरैर्विलिखितं हृदि चरितन्ते भूपुण्यम्!!
उद्भ्रान्तपथिक! पश्यैहि त्वज्जगतो जीर्णं गेहम्!
मूर्च्छितं जीवनं, शून्यामाशां, मृतमीप्सितदेहम्!!

लघुता

भूपतितपावनी गङ्गाऽनङ्गार्यंत्तमाङ्गवासा ।
किस्वहेत् भूतले पतिता लघुता नोचेद् गुरुत्वासा !!

आधेहि जगन्निजहृदये यास्यति तत्तदैव लघुताम् !
हृदयङ्गमं समं कुरु रे ! वाञ्छसि कर्तुं यल्लघुताम् !!

दूरस्थो यावल्लोको लोकादपि दूरस्थस्त्वम् !
मृण्मयस्य जगतस्तावद् दृश्यते तथैव गुरुत्वम् !!

दूरत्वादेवाज्ञायीदं नभश्शून्यमपि पूर्णम् !
अप्राप्तत्वाच्च नृपत्वे धीयते गौरवन्तूर्णम् !!

अतएवालब्धपदं यत्तत्तन्निगद्यते गुरुवत् ।
उद्योगादात्मकृतं लघु सर्वं पुराऽभवद्गुरु यत् !!

इन्द्रस्यापि किं निजत्वे किञ्चिद्वर्तते गुरुत्वम् ;
अल्पाद्दूरीकरणे किन्तु गुरोरप्यस्ति गुरुत्वम् ?

भ्रमरगानम्

(१)

इन्दिन्दिर, निन्दसि मकरन्दम् ?
पीत्वा पूर्व्वमपूर्व्वप्रेमपूर्व्वकमयि ! मन्दं मन्दम्;
इन्दिन्दिर, निन्दसि मकरन्दम् ॥
कलकलिकेयं वरवृन्तेन सुखं सुप्ता मिलिताऽऽसीत्;
दासीकृतनलिनेनेषन्नयनेन भुवं स्वच्छन्दम्—
पश्यन्ती, वश्यन्त्रिलोकमाकर्षन्ती सानन्दम् ।
इन्दिन्दिर, निन्दसि मकरन्दम् ?
सरसि निविश्य मुखं सुखं चुचुम्बिथ नवरसं चषन् सन्;
सन्मुखमसाम्प्रतं साम्प्रतमपि कृतवानन्वरविन्दम्—
विन्दन्नानन्दरूपरात्परं कमपि नवीनममन्दम् ।
इन्दिन्दिर, निन्दसि मकरन्दम् ?
असमय उल्लासम्विकासमपि तव सङ्गमादवापत्,
नवापदाऽपि पदन्निहितन्तज्जीवनाङ्गने मन्दम्—
धृत्वा शिरसि परागरागमपि साऽविन्दन्नानन्दम् ।
इन्दिन्दिर, निन्दसि मकरन्दम् ?

(२)

स्नेहे को न दहति निजदेहम् ?
सखि, पतन्तमयि, पश्य पतङ्गन्दीपे दीपितदेहम्;
स्नेहे को न दहति निजदेहम् ?

सुरभौ सदा विटपिनः कथमयि, पातयन्ति नु दलानि,
दर्शयन्ति किन्ते न समन्तात्स्वीयवसन्तस्नेहम्।
स्नेहे को न दहति निजदेहम्?

ज्वलदङ्गारं खादति किं नु विहगचञ्चुरश्चकोरः;
दीपयत्यसौ किं प्रियसखि! सुस्नेहसगौरवगेहम्?
स्नेहे को न दहति निजदेहम्?

ललितललामकलितगीतं स्फीतमधुमोहनभावम्;
देहदहनमपि प्रेमप्रसङ्गे वक्ति वीतसन्देहम्।
स्नेहे को न दहति निजदेहम्?

(३)

स्नेहे भवति सदैव हि चित्रम्।
पापं मनः कदापि भवति पुनरपि च कदापि पवित्रम्।
स्नेहे भवति सदैव हि चित्रम्।

दामोदररक्ता ललिता कालिन्दी किं श्यामाऽभूत्?
पाटल-पाटलितालेरङ्गं श्यामं किमिति सचित्रम्?
स्नेहे भवति सदैव हि चित्रम्।

प्रेमिविप्रयोगे जलदः पातयति तप्ततरतैलम्।
शीतलतमोऽप्यसौ सुधाकरः कुरुते ज्वलितचरित्रम्॥
स्नेहे भवति सदैव हि चित्रम्।

'ललितललाम' प्रसूनपरागोऽनुमीयते मुर्मुरवत्।
नालो व्याले दशोऽमृतं तरलं गरलञ्च विचित्रम्॥
स्नेहे भवति सदैव हि चित्रम्।

व्यथाकथा

अद्य न नयने वारि हारितं हृदयन्तस्यागारे;
विहरति मतिर्न चलचन्द्रिकेऽम्बरे चारुणि सुकुमारे।
उच्छ्वासच्छायायामाशाभग्नमन्दिरे मन्दम्;
क्रीडन्ती पीडाभिस्सह जीवास्यधुना सानन्दम्।
मलयानिलचञ्चलरजनी श्यामाञ्चलतलेऽमलेऽहम्;
प्राणक्षीणशिखायास्प्रेदे - निज - निर्वाण - प्रकाशम्।
एकान्ते शान्ते विपिनेऽस्मिन् वसतीयं वनबाला;
वनमाली पुनरेतिनोऽद्य शुष्का जीवनवनमाला।
किं कथयसि निर्दयतायाः प्रथयेयन्तथा प्रथाङ्किम्?
किं कथयसि कथयेयस्त्वयर्थम्मनसोव्यथाकथाङ्किम्?
कृत्वा सरलां सरसस्वरां विकस्वरप्राणसुवीणाम्;
वादयन्ती गायेयमाकुलाङ्गीतिम्पुनर्नवीनाम्?

× × ×

अयि अनयायन नयन, नय न मामपि मञ्जुलमुपकूलम्;
शोकाम्बुनिधे, विधेः प्रसादादाप्तम्मङ्गलमूलम्।
किम्पश्यसि मां हतनियतिम्बत हरिण विलोलविलोचन!
शान्तिविमोचन! इह मां वामां वामाञ्जना अवोचन्।

मञ्जोचने विलोक्य विलोके लोकेऽशोकश्शोकम्;
धत्ते बत ! तच्चाञ्चल्यं विकलयति सकलमपि लोकम् ।
स्थावरमपि जङ्गमयति, गमयति नमयति स्वान्तश्च —लताम् ।
हन्त ! सन्तमपि चलयति कलयति मार्गं मनोऽपि चलताम् ।

सखे ! सखेदं पृच्छामि त्वां कथमिव मामुपयासि ?
किम्पश्यसि मामनिमेषनयनो, मनोरथे कासि ?
मानवी नवाऽहं वनवासिन् ! भ्रान्ता भ्रान्त नितान्तम्;
कुन्दनिकुञ्जे मञ्जुमुकुन्दं मृगयेऽस्मिन्निजकान्तम् ।
पथ्यङ्कथयाम्यहञ्च तथ्यं, परमात्माऽसौ साक्षी;
स्वच्छहृदय ! माऽऽगच्छ, नास्मि मृगजातिरहन्तु मृगाक्षी ।
गच्छ, गतोऽसि हताश्विहाय मां हन्त हरे ! त्वं कासि ?
चलितुन्नो प्रभवामि यामि कुत्रेह कथन्नायासि ?
सततं विहितरतिश्श्यामे त्वयि रतिरिव कामे, बाला;
भवति नीरसोषो ग्रथितेयम्वनमालिन् ! वनमाला ।
कुञ्जकुञ्जरे कृतकरुणोऽरुणनयन ! कथन्नोदयसे ?
शेषेऽशेषे जड़धिविशेषे शेषे किम्पुनरयसे !
चन्द्रहतक ! किंवीक्ष्य विषण्णां षण्णारम्मध्ये हससि;
किं कुर्यां पुर्यान्नो, गगने निर्मन्दात्तो वससि ।
जडधिजात ! जड ! किं विलोक्यते ते हृदयस्था जडता ?
हालाहलसोदर ! स्वोदरे पिहिता हालाहलता ।

हताभिधान सुधाकर, वमसि विषाकर विषं भृशं किम्?
ग्राम्यदोषमिव काव्यस्मे, दोषाकर! गुणस्पृशं किम्?
कुमुद! मुदं कुमुदाय ददासि, मुदा न; नामसारूप्यात्;
अरविन्दं मन्दं मन्दं मुकुलयसि पाप! वैरूप्यात्।
अनलायसि किस्मलयानिल! किल, किलकिञ्चितमवलोकय।
मन्दय मान्द्यस्मे मन्दार! हृदस्मेऽशोकाशोकय।

× × ×

वक्तुन्नो पारये रयेन व्यथाकथान्न समग्राम्;
संस्मार्य्यं श्रीनिधे! मया मा मां कुरु विफलव्यग्राम्।

सुलोचना

मन्ये, धन्ये ! तदा सदाऽऽसीत्प्रीत्या वसन् वसन्तः ।
गुञ्जन्तो मधुलिहस्समन्तात्कोकिलाश्च विलसन्तः ॥
बालरसालसालमालायाङ्कुसुमाली विकसन्ती ।
मध्ये मञ्जुलवञ्जुलकुञ्जम्बासन्ती विहसन्ती ॥
दलदरविन्दं मन्दं मन्दं सामोदो मदधीरः ।
मदयन्मुनिजनमनो ववौ मृदु मधुमयमलयसमीरः ॥
उषोमञ्जुमदनः कदनस्तमसो लासितलौकिकसदनः ।
बालविभाकरविभुर्बभौ भासाचीकृतप्राचीवदनः ॥
सरससुधास्वसुधान्विधाय वा नभसि यामिनीकान्तः ।
बभौ सलीलसलिलकालिन्दीकूलेऽभ्रान्तश्शान्तः ॥

× × × ×

विधिरुशनसा प्रशंसितं सितं श्रीवर्णननैपुण्यम् ।
श्रावं श्रावन्द्रष्टुमुत्सुकस्तादृग्रूपं पुण्यम् ॥
आज्ञापितवान् कालिदासमयि कवे ! धेहि मत्स्थानम् ।
उत्कृष्टं कुरुते नैपुण्यस्बालस्बाऽपि युवानम् ॥
लग्नो विधेर्विधाने जाने कलकालिन्दीपुलिने ।

आसीनोऽदीनोज्ज्वलासने तत्क्षणे स तद्विपिने ॥
एकान्ते कान्ते ! शान्तस्वान्तोऽरचयन्निर्गन्धम् ।
ललनालोकललामामभिरामान्त्वास्मन्दस्मन्दम् ॥
त्वन्मुखलावण्यं विलोक्य, तादृग्लब्धुं स मृगाङ्कः ।
रहसि नभसि हित्वा सभां गतश्चरितुन्तपस्सशङ्कः ॥
ललितलोचनेऽलङ्कलयन्ती हरिणावली महीयसि—
घने वने चपलरुपलायिता लज्जयाऽलि सुमहीयसि !
खञ्जनोऽपि खञ्जोऽभवत्तथावीक्ष्य विलोले ते ते ।
इन्दीवरवृन्दरुपङ्काङ्के विरससरसि हा ! शेते ॥
आयते मते ते नयने धन्ये, मन्ये त्वन्धन्या ।
त्वां विलोक्य धन्यो वन्योऽहं, कवितालीमे धन्या ॥*

———❀———

* Sulochana, the queen of modern movie—stars.

सफलता

श्रान्तोऽस्मिन, किन्तु न मृगयेऽहं क्वचिदपितेऽध्वानम्
शान्तोऽस्मिन, किन्तु न याचे, चेतस्यपि ते मिलनम् ।
नोत्तिष्ठति लब्धुम्प्रसादमप्यसफलतरः करो मे ;
भृशमवलुलिते भवति न हृदये मनोरथोऽप्यपरो मे ।
वर्षतो विलोचने दीनताचणेऽप्यदूय मृदुमुक्ताः ;
परप्रतीक्षावसरे सङ्कल्पशतैर्भोगा भुक्ताः ।
अद्य न मरुकण्ठान्निर्गच्छति सरसतमन्ते नाम ;
नागमनस्थावश्यकता ज्ञात्वा मांविवशं नाम ।
देव ! परीक्षितमेव मया ते दीनबन्धुरभिधानम् ;
मैहि, रक्ष शिष्टं 'निर्दय' इति नाम नैजमनिदानम् ।

लोचनोल्लङ्घनम्

अद्यावधि प्राप्तस्मया यत्तत्समीपेपादयोः,
अधिकल्न चेल्लङ्घल्न किन्दोषोऽप्यसौ वाचक ! तयोः १
इत्थं विचार्य्य विसार्य्य आर्य्य ! कदाचिदपि नोऽहन्त्वया;
क्षन्तव्य एष जनोनिजश्चेत्किञ्चिदपराद्धस्मया ।

× × ×

शैशवे स्खलितैव वाणी भण्यते समबालकैः;
सस्मितं सा श्रूयते तद्बान्धवैस्सुजनैर्न कैः १
दुष्टैस्तदाऽपि विहस्यतेऽपुष्टार्थभाषाभाषिणम्—
तम्प्रेक्ष्य, तच्चेष्टाकरस्मन्येऽधुनाऽपि तनुन्तृणम् ।

× × ×

त्वस्मेऽसि वाचक ! तेऽस्म्यहन्निजकविधनन्तत्ते धनम्;
उपयुज्यतामधुनात्मवृत्ति विधाय भगवन्निजधनम् ।
सानन्दमधुनाऽनन्तमार्गेऽहङ्क्रमिष्याम्यश्रमात्;
प्रेमाश्रु पाथेयङ्गृहीत्वा यामि ते नयनाश्रमात् ।
मन्द्रं स्वरेण सुखे जपन्मन्देन "वन्देमातरम्" ।
यावत्समैर्विनिगद्यतामयि देव ! 'वन्देमातरम्' ॥

——:०:——

वाणीवन्दनम्

(१)

कलक्वणनकच्छपीरणनदत्तकर्णादरा —
इरोऽन्नतमुखी कलाकलितगीतिकागायने ।
विभाकरविभानिभाकृतिमणिस्फुरच्छाटिका
प्रभाभिनववाटिका जयति सा जगन्नाटिका ॥

(२)

विलोचनविघूर्णनाद्विपुलविश्वसञ्चालिका,
विवेकनयनम्रतालसितसत्कलालालिका ।
स्फुरत्वनिशमेव मे मृदुलमालतीमालिका,
त्रिलोकपरिपालिका मनसि वेधसो बालिका ॥

(३)

कुकर्ममकरावृते भुवनवारिधौ मज्जता
न्दयाकृतनिजोदयाऽमलकुतूहलात्पारदा ।
समुल्लसतु मानसे मम विचारदाऽऽचारदा
स्वभक्तिरतिसारदा नयविशारदा शारदा ॥

(४)

विधेहि विधिनन्दिनि ! स्वरुचिकौमुदीनन्दिनी;
सुखेन वचनावलीम्मम मुखे सुधास्यन्दिनीम् ।
कृपामयि ! कृपाकदम्बित-कटाक्षपातम्मुहु-
स्तवैव सगुणे ! गुणावलिविलेखिनीं लेखिनीम् ॥

——:o:——

इति

॥ शुभम् ॥